शिवाद्वैतमञ्जरी

श्रीस्वप्रभानन्दशिवाचार्यविरचिता

सम्पादकः

डॉ० चन्द्रशेखरशर्मा हिरेमठः

संस्थानजङ्गमवाडीमठः, वाराणसी

१९८६ ई०

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

*****

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

शिवधर्मग्रन्थमालायाः २९ तमं पुष्पम्

शिवाद्वैतमञ्जरी

श्रीस्वप्रभानन्दशिवाचार्यविरचिता

सम्पादकः
डॉ० चन्द्रशेखरशर्मा हिरेमठः
रिसर्च एसोसिएट
वेदान्तविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये वाराणसीस्थे

प्रकाशकः
प्रबन्धकः, जङ्गमवाडीमठस्य
वाराणसी

वि० सं० २०४३] १९८६ ई० [शा० सं० १९०८

प्रकाशकः—
प्रबन्धकः, डी ३५/७७ जंगमवाडीमठस्य
वाराणसी

प्रथमं संस्करणम्
१००० प्रतयः
मूल्यम् ५/००

मुद्रक :
रत्ना प्रिंटिंग वर्क्स, बी २१/४२ए
कमच्छा, वाराणसी ।

श्रीकाशीविश्वाराध्यज्ञानसिंहासनाधीश्वराणां

श्री १००८ जगद्गुरुविश्वेश्वरशिवाचार्यमहास्वामिनां

शुभाशीर्वचनम्

अतीव प्रमोदविषयोऽयं यद् बहुकालात् सुदुर्लभतामापन्नः शिवाद्वैत-मञ्जर्याख्यो ग्रन्थोऽधुना सुलभतामापद्यत इति। अमृतमयीयं देववाणी पाश्चात्यसंस्कृत्या संस्कृतैर्जनैर्मृतभाषेति प्रचार्यत इति महत् कष्टम्। एतेषां भ्रमनिरासाय सर्वैरपि संस्कृतविद्वद्भिः प्रयतितव्यम्। इदानीन्तनी दुरवस्था न दूरीभवेत् चेदचिरेणैव कालेन अवशिष्टापि देववाणी देवलोकं गता भवेत्।

भारतीयं सर्वमपि साहित्यं प्राचीनैर्महर्षिभिः संस्कृतवाण्यैव निबद्धमिति तस्य वास्तविकज्ञानलाभार्थं सर्वैरपि भारतीयैः संस्कृतमपरिहार्यतयाऽध्ये-तव्यम्।

अस्माकं श्रीविश्वाराध्यगुरुकुलेऽनादिकालादारभ्य संस्कृतानुरागिणो बहवश्छात्रा विभिन्नविश्वविद्यालयेष्वध्ययनं कृत्वा देशस्य विभिन्नप्रान्तेषु संस्कृतस्य संस्कृतेश्च संवर्धनाय प्रयतन्त इति मनसि परमोल्लासः संजायते।

इदानीं च गुलेदगुड्ड-अमरेश्वरमठीयो डॉ० चन्द्रशेखरशर्मा हिरेमठः षोडशवर्षं यावद् विश्वाराध्यगुरुकुलमधिवसन् सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयस्य वेदान्ताचार्यविद्यावारिधीत्युपाधिद्वयं सम्प्राप्याधुना "वीर-शैवतत्त्वत्रयविमर्शः" इति विषयमधिकृत्य केन्द्रसर्वकारस्य (U.G.C.) आर्थिकेन साहाय्येन विशेषरूपेण संशोधनकार्यं सम्पादयन् तत्रैव वेदान्त-विभागे शक्तिविशिष्टाद्वैतवेदान्तस्य शास्त्रि-आचार्य-कक्षाप्रविष्टान् छात्रा-नध्यापयति।

इतः पूर्वमयं "शिवाद्वैतपरिभाषा" इत्याख्यस्य ग्रन्थस्य सम्पादनं कृतवान्, अधुना च शिवाद्वैतमञ्जर्याः सम्यक् सम्पादनमकरोदिति ग्रन्थोऽय-मस्मदीयशिवधर्मग्रन्थमालायामेकोनत्रिंशत्तमपुष्परूपेण प्रकाश्यते। एवमेवा-नेन प्राचीनवीरशैवसंस्कृतसाहित्यस्य सम्पादनादिकं कार्यमनवरतं प्रभव-त्विति हार्दिकं शुभाशीर्वचनं प्रदीयतेऽस्मै।

॥ शिवं भूयात् ॥

प्राक्कथनम्

वीरशैवमतानुवर्तिभिराचार्यैः समुद्भावितस्य शक्तिविशिष्टाद्वैतवादस्य वेदान्तविभागीयपरीक्षापाठ्यक्रमेषु स्वातन्त्र्येण समावेशः कृतः सम्पूर्णानन्द-संस्कृतविश्वविद्यालयेनेति प्रमोदस्यायमवसरः। विषयस्यास्य पूर्वं प्रकाशिता अप्यनेके विशिष्टा ग्रन्थाः साम्प्रतं नोपलभ्यन्त इति करुणामूर्तिभिः काशीस्थ-ज्ञानसिंहासनाधीश्वरैः श्री १००८ जगद्गुरुविश्वेश्वरशिवाचार्यमहास्वामिभिः संस्कृतभाषाध्येतॄणां छात्राणामुपकाराय नैके ग्रन्थाः पुनः प्रकाश्य स्वल्प-मूल्येन सुलभीक्रियन्त इति प्रशंसनीयोऽयं समुद्यमस्तेषामाचार्यचरणानाम्। तेष्वन्यतमोऽयं विद्यते ग्रन्थः शिवाद्वैतमञ्जरीनामधेयः। अस्य सम्पादकः श्रीमान् डॉ० चन्द्रशेखरशर्मा हिरेमठो वर्ततेऽस्यैव विषयस्याध्यापकः। तदनुरोधेनात्र किमपि प्राक्कथनरूपेण लिख्यते छात्राणामुपकाराय।

उद्धृतग्रन्थग्रन्थकारपरिचयः

नानाश्रुतिस्मृतिपुराणागमादिवचनानि प्रमाणत्वेनात्र समुद्धरति ग्रन्थ-कारः। तेष्वथर्वशिखोपनिषत्-कठवल्लीप्रभृतिभिः प्रायो वयं सर्वे परिचिताः स्मः। सन्ति केचन विशिष्टा ग्रन्था अत्र स्मृताः, येन ग्रन्थकारस्य कालनिर्ण-योऽपि यथा कथञ्चित् कर्तुं शक्येत। तत्र रुद्रयामलस्यांशभूतं त्रिशिकाशास्त्रं[1] सोमानन्दभवभूतिपुरोगमैर्विद्वद्भिर्व्याख्यातपूर्वं साम्प्रतमभिनवगुप्तव्याख्यानो-पेतमुपलभ्यते। शिवसूत्राणि कश्मीरेषु महादेवगिरौ शिलाशकलोत्कीर्णानि वसुगुप्तपादेन शिवप्रसादादुपलब्धानीति वर्तते आख्यायिका शिवसूत्रविमर्शिनी-कारक्षेमराज-शिवसूत्रवार्त्तिककारवरदराजाभ्यां स्मृता स्वस्वग्रन्थारम्भे। तच्छिष्यपरम्परायामष्टम्यां नवम्यां वा शताब्द्यां शिवदृष्टिकारः सोमानन्दो जनिं लेभे। सारस्वतसूत्रे द्वे ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यामभिनवगुप्तः[2] समुद्धरति। शिवसूत्रे ते इति भणति क्षेमराजः। मुद्रितेषु शिवसूत्रेषु ते नोपलभ्येते। शिवसूत्राणां तुरीयोंऽशः साम्प्रतं न दृश्यत इति तदभावे

१. "श्रीसोमानन्दकल्याणभवभूतिपुरोगमाः। तथाहि त्रीशिकाशास्त्रविवृतौ तेऽप्यघु-र्बुधाः" ।। (१३।१४९-१५०) इति तन्त्रालोकेऽभिनवगुप्तः।

२. लुप्तागमसंग्रहद्वितीयभागस्य उपोद्घातो (पृ० ७५) द्रष्टव्यः।

किमप्यत्र न निश्चयेन वक्तुं शक्येत । शिवाद्वैतमञ्जरीकारस्तु आर्याच्छन्दसि
निबद्धं तत्रत्यं श्लोकमेकं समुद्धरति । विशिष्टः कश्चन एष ग्रन्थः स्यात्
अस्य विषये इतोऽधिकं किमपि नोपलभ्यते । शिवसूत्रवार्त्तिकवचनमत्रोद्ध
वरदराजकृते प्रथमसूत्रवार्त्तिके दृश्यते । स च क्षेमराजं स्मरतीति
तत्परवर्ती ।

कालिदासकृतित्वेन प्रसिद्धा चिद्गगनचन्द्रिका वर्तते क्रमसम्प्रदाय
ग्रन्थः । नास्य कर्ता महाकविः कालिदासः, किन्त्वन्य एव कश्चिद् एकाद
द्वादशशताब्दीभवः कालिदासपदाभिधेय इत्यस्य विस्तृतः परिचयोऽन्यत्र
द्रष्टव्यः । मातृकाचक्रविवेकाख्यो ग्रन्थः स्वतन्त्रानन्दनाथविरचितः सरस्वती
भवनग्रन्थमालायां प्रकाशितपूर्वः । ग्रन्थसम्पादकैरस्य स्थितिविषये
किमप्युक्तम् । स्कन्दपुराणस्य खण्डात्मकं संहितात्मकं चेति द्विविधं स्वरू
मुपलभ्यते । खण्डात्मकं स्वरूपमुत्तरभारते, संहितात्मकं च दक्षिणभा
प्रचलदास्ते । खण्डात्मकं स्कन्दपुराणं मुम्बापुरीस्थवेङ्कटेश्वरमुद्रणालय
प्रकाशितम्, संहिताविभागीया सूतसंहिता च मुद्रिता वर्तते । संहिताविभ
सनत्कुमार-सूत-शङ्कर-वैष्णव ब्राह्म-सौराख्याः षट्संहिता विद्यन्ते । एत
प्रस्तुतेन ग्रन्थकारेण तृतीया शङ्करसंहिता तत्र तत्र समुद्धृता ।

ग्रन्थकारस्य देशकालौ

प्रत्यभिज्ञादर्शनप्रधानां दृष्टिमनुसरन्तो बहव आचार्याः शिवानन्द-पुण्या
नन्द-अमृतानन्द-महेश्वरानन्दादयो दाक्षिणात्याः श्रूयन्ते । तत्र पुण्यानन्दकृ
कामकलाविलासस्य व्याख्याकारो नटनानन्दः स्वग्रन्थारम्भे नाथान
प्रणमति । सोऽयं नाथानन्दः शिवाद्वैतमञ्जरीकारस्य स्वप्रभानन्द
गुरोर्नाथानन्दादभिन्नो भिन्नो वेति न निश्चेतुं शक्यते, तथापि चिद्गग
चन्द्रिकां मातृकाचक्रविवेकं स्कन्दपुराणीयां शङ्करसंहितां च समुद्धरन्
दाक्षिणात्य इत्येव प्रतिभाति । अमृतानन्द-महेश्वरानन्दादयोऽपि चिद्गग
चन्द्रिकां स्मरन्ति । एकादशी द्वादशी वा शताब्दी अस्या रचनाकालः । त
परतनाश्च सन्ति पुण्यानन्दनाथादयः[२] । नटनानन्दसमसामयिकः स्यात्

१. डॉ. नवजीवनरस्तोगीविरचितः "क्रम तान्त्रिसिज्म आफ कश्मीर" इत्या
ग्रन्थो (पृ० १९५-१९९) द्रष्टव्यः ।

२. तन्त्रयात्रायां प्रकाशितः "त्रिपुरादर्शनस्यापरिचिता आचार्याः कृतयश्च" (
६४-७८) इत्याख्यो निबन्धः, "आगम और तन्त्रशास्त्र" इत्यत्र स्थि
"योगी अमृतानन्द" (पृ० ७९-८८) इति शीर्षको निबन्धो द्रष्टव्यः ।

स्वप्रभानन्द इत्येव साम्प्रतं वक्तुं शक्यते। [1]आनन्दनाथान्तनामधेया योगिनो भवन्ति भगवत्यास्त्रिपुरायाः समुपासका इत्यस्य त्रिपुरासम्प्रदायानुवर्तित्वमपि सिद्धयत्येव।

पूर्वपक्षोपक्षेपस्तन्निरसनं च

मङ्गलाचरणमुखेनात्र [2]श्रीनाथाख्यस्य गुरोर्द्वादशान्तस्थं[3] चरणयुगलं योगशास्त्रोपदिष्टया पद्धत्या प्रणम्य, अनात्मकल्पं निर्विशेषाद्वैतवादं प्रदूष्य, अखिलस्य विश्वस्य ब्रह्मरूपत्वं शिवात्मकत्वं च प्रसाध्य शिवाद्वैतमञ्जरीति ग्रन्थनाम्नः सार्थक्यं समुद्घोषयति ग्रन्थकारः। ततो विवर्तवादिनो भगवतः शङ्कराचार्यस्याध्यासभाष्यीयमंशजातं विस्तरेण समुद्धृत्य तस्य प्रतिपदपरीक्षां समारभते। प्रथमं स अविद्यासद्भावे न किमपि मानमिति सयुक्तिकं साधयति। ततः प्रौढ्या तामङ्गीकृत्यापि ब्रह्माविद्ययोराश्रयाश्रयिभावसंबन्धो न साधयितुं शक्यत इत्युक्त्वा अविद्याया अनिर्वचनीयत्वं जीवविषयत्वम् अनादिभावरूपत्वं च खण्डयति, स्मृतिरूपः परत्र पूर्वदृष्टावभास इत्यध्यासलक्षणं च परीक्षते। ततः परं ग्रन्थकारो युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोरित्यत्र निर्दर्शितं जडचेतनविभागम्, आत्मनः प्रमेयत्वं च खण्डयति। अन्ते च विवर्तवादे नानादोषान् समुद्भाव्य प्रकरणमिदमुपसंहरति (पृ० १-८)।

स्वपक्षस्थापनम्

एवं प्रधानमल्लन्यायेन निर्विशेषाद्वैतवादं समालोच्य ग्रन्थकारः स्वमतप्रतिष्ठायै सारस्वतसूत्र-श्रुति-ब्रह्मसूत्रादिप्रामाण्येन शक्तितत्त्वं शक्तिविशिष्टाद्वैतवादं च निर्वक्ति, सच्चिदानन्दपदानां तत्र गतार्थतां च विस्तारयति। शिवाभिधं ब्रह्म स्वेच्छाशक्तिरूपापोहनटङ्कवशात् शिवादिधरण्यन्तषट्त्रिंशत्तत्त्वात्मना विचित्रीकृत्य सृष्टिस्थितिसंहारबन्धमोक्षलक्षणपञ्चकृत्यमहानाट्यरसिकः सन् क्रीडत इति राद्धान्तं चात्र स्थापयति (पृ० ९-११)। अत्र "मत्तः स्मृतिर्ज्ञानमपोहनं च" (१५।१५) इति भगवदुक्त्यनुसारं स्मृतिज्ञानापोहनाख्यासु तिसृषु शक्तिषु तृतीयस्या उल्लेखो ग्रन्थकारेण कृतः।

---

१. परशुरामकल्पसूत्रं (१।४०) द्रष्टव्यम्।
२. ग्रन्थान्ते नाथानन्द इति गुरोर्नाम दृश्यते।
३. द्वादशान्तपदपरिचयो विज्ञानभैरवीयोपोद्घाततो (पृ० २४-२५) ज्ञातव्यः।

शक्तित्रयमेतदीश्वरप्रत्यभिज्ञाकारेण ज्ञानाधिकारे त्रिष्वाह्निकेषु (४- विस्तरेण [1]विवृतमिति ततो विशेषजिज्ञासुभिस्तासां स्वरूपं ज्ञातव् पञ्चकृत्येषु समुल्लिखितौ बन्धमोक्षशब्दौ च निग्रहानुग्रहयोर्बोधकावि मन्तव्यम्। अत्र विश्वस्य ब्रह्माभिन्नतायां कथं तत्र बन्धमोक्षव्यवस् प्रवर्ततेति शङ्काऽपि ग्रन्थकारेण साधु समाहिता, चिद्गगनचन्द्रिकाप्रामाण् ईश्वरेच्छाया एवात्र नियामकत्वमिति चाभ्युपगतम् (पृ० ११-१२)।

पञ्चसूत्रीव्याख्यानम्

एवं स्वमतं प्रतिष्ठाप्य ग्रन्थकारस्तदनुगुणं ब्रह्मसूत्राणि कानि व्याख्यातुकामः प्रथममथातो ब्रह्मजिज्ञासेत्याद्यं सूत्रं विषय-संशय-पूर्वप सिद्धान्तप्रतिपादनपुरस्सरं व्याख्याति, शक्तिविकासलक्षणमोक्षावाप् शास्त्रमारम्भणीयमिति व्याससूत्राणां प्रयोजनं च प्रतिपादयति। अन पद्धत्या जन्माद्यस्य यत इति द्वितीयं सूत्रं द्विधा व्याख्याय तान्त्रिकपाशुप मतं च समालोच्य शिवस्यैव विष्णुनारायणरुद्रादिपदाभिधेयत्वं साधयति ततः स शास्त्रयोनित्वादिति तृतीयम्, तत्तु समन्वयादिति चतुर्थं च विवृणोति, उपक्रमादिभिः षड्विधैर्लिङ्गैर्वेदान्तानां ब्रह्मपरत्वं च साधयति इमे सर्वेऽपि विषयाः श्रीकण्ठभाष्यपद्धत्याऽत्र व्याख्याता इति त्ववधेयम् तत ईक्षतेर्नाशब्दमिति पञ्चमसूत्रव्याख्यानप्रसङ्गेन ग्रन्थकारः सांख्या नैयायिकानां च मतं समालोचयति, शिवदृष्टिप्रामाण्येन च स्वतन् स्वप्रकाशताशक्तिपरिबृंहितं ब्रह्मैव तच्छब्दवाच्यमिति सिद्धान्तं च पुनर स्थूणानिखननन्यायेन प्रतिष्ठापयति (पृ० १२-२३)।

एवं पञ्चसूत्राणि व्याख्याय ग्रन्थकार उत्तमाधिकारिणं प्रति ईक्षत्यन्तै ब्रह्मविद्या, मध्यमाधिकारिणं प्रति पञ्चपादिका, अधमाधिकारि प्रत्यवशिष्टशास्त्रं प्रवृत्तमिति स्वमन्तव्यं समुपस्थापयति। ततश्चाग्रेतना कानिचन सूत्राणि समुल्लिख्य मायाशब्दं च व्याख्याय ब्रह्मसूत्रशिवसूत्रयो रेकार्थविश्रान्तत्वमुद्घोषयति (पृ० २४)।

वीरशैवीयं लिङ्गाङ्गसामरस्यम्

एवं सामान्यतः शक्तिविशिष्टाद्वैतवादं प्रतिष्ठाप्य तत्परकत्वेन कानिच ब्रह्मसूत्राणि च व्याख्याय ग्रन्थकारो वीरशैवपदव्युत्पत्तिं प्रदर्शयति, लिङ्गाङ्ग

---

१. शक्तित्रयस्य संक्षिप्तः परिचयो महार्थमञ्जरीपरिमले (पृ० १३५-१३६) द्रष्टव्यः

सामरस्यप्रतिपादकान् तत्सिद्धान्तांश्च विशदयति। प्राधान्येन स्कन्द-पुराणीयशङ्करसंहितादिप्रामाण्येन प्रतिपादितास्त इमे विषया मूलग्रन्थे (पृ० २४-२३) एव द्रष्टव्याः। तदिदं लिङ्गाङ्गसामरस्यं विवर्तवादे न संभवतीति हि ग्रन्थकारस्य निष्कृष्टोऽभिप्रायः।

षट्त्रिंशत्तत्त्वप्रसारप्रक्रिया

अन्ते च ग्रन्थकारः षट्त्रिंशत्तत्त्वात्मकस्य विश्वस्य शिव इत्यक्षरद्वयेऽक्षरचतुष्टये वान्तर्भावप्रकारं शैवागम-मातृकाचक्रविवेक-पराशरोपपुराण-त्रिंशिकाशास्त्र-शिवसूत्र-शिवसूत्रवार्त्तिकादीनां प्रामाण्येन प्रदर्शयन् षट्त्रिंशत्तत्त्वप्रसरणप्रक्रियायाः सांख्योक्तपञ्चविंशतितत्त्वप्रक्रियातोऽविरोधं तथैव प्रतिपादयति, यथा हि नैयायिकोक्तषोडशपदार्थप्रक्रियाया वैशेषिकोक्तसप्तपदार्थीप्रक्रियातोऽविरोधः प्रतिष्ठाप्यते। ग्रन्थान्ते पुनरपि शिवसूत्रब्रह्मसूत्रयोरेकार्थप्रतिपादकत्वं स्मारयन् ग्रन्थकारो नूनं प्रत्यभिज्ञादर्शनकोविदत्वमात्मनः प्रख्यापयति (पृ० ३२–३७)।

एवं लघुकायेऽप्यस्मिन् ग्रन्थे परपक्षनिरसनस्वपक्षस्थापनमुखेन प्रत्यभिज्ञादिदर्शनप्रतिपादकान् शैवागमग्रन्थानादृत्य शक्तिविशिष्टाद्वैतवादः सम्यक्तया प्रतिष्ठापित इति समनोयोगमध्येतव्योऽयं ग्रन्थो वीरशैवदर्शनाध्येतृभिः, शक्तिविकासलक्षणमोक्षावाप्तये च तत्त्वजिज्ञासुभिरिति शम्॥

ऋषिपञ्चमी, संवत् २०४३ — विद्वज्जनविधेयः
८-९-८६ ई०, वाराणसी। — व्रजवल्लभद्विवेदः

सम्पादकीयम्

वेदागमोपनिषत्पुराणेतिहासप्रसिद्धस्य वीरशैवीयशक्तिविशिष्टाद्वैतवेदान्तस्य प्रतिपादकाः सन्ति बहवो ग्रन्थाः संस्कृतवाङ्मये। तेष्वन्यतमोऽयं शिवाद्वैतमञ्जर्याख्यः। अयं च पण्डितप्रवरेण श्रीमता स्वप्रभानन्दशिवाचार्येण विरचितः। एते च महाभागाः स्वकीयायां शिवाद्वैतमञ्जर्यां तत्र तत्र शिवसूत्र-शिवसूत्रवार्त्तिक-शिवदृष्टि-त्रिंशिकाशास्त्र-चिद्गगनचन्द्रिकाद्यनेकान् काश्मीरदेशप्रसिद्धान् ग्रन्थान् प्रमाणत्वेनोदाहरन्ति, स्वनाम्नि आनन्दपदं च संयोजयन्तीति काश्मीरदेशनिवासिनश्चोलदेशवासिनो वा वीरशैवाचार्या एते सन्तीति विज्ञायते। एतेषां गुरुवर्याणां च नाम नाथानन्द इत्यासीत्।

ख्रि० श० अष्टमशताब्दीयानां सोमानन्दाचार्याणां शिवदृष्टिग्रन्थस्य एकादशद्वादशशताब्दीभवस्य कालिदासस्य चिद्गगनचन्द्रिकायाश्च स्वकीयायां शिवाद्वैतमञ्जर्यां नामग्रहणपूर्वकमुदाहृतत्वादेते तत्परवर्तिन इत्यनुमीयते।

इयं शिवाद्वैतमञ्जरी लघुकलेवरापि महदर्थगौरवभरिता वर्तते। शास्त्रीयपाण्डित्यशून्याः केवलं संस्कृतज्ञाः पण्डिता अस्यार्थनिर्णये न प्रभवेयुः। ग्रन्थस्यास्य एका प्राचीना संस्कृतव्याख्या आसीदिति श्रूयते, किन्तु साऽधुना नोपलभ्यत इति दौर्भाग्यमेव।

के० नागनूरुबृहन्मठाध्यक्षाः पण्डितप्रवराः काशीनाथशास्त्रिमहाभागाः ख्रि० श० १९३४ तमे वत्सरे कर्नाटकदेशीयानां तत्त्वजिज्ञासूनामुपकाराय मैसूरुमहाराजसंस्कृतमहापाठशालायाः प्राध्यापकं पूर्वोत्तरमीमांसाभूषणविद्यानिधीत्याद्युपाधिभिरलङ्कृतं पण्डिताग्रगण्यं देवशिखामणिरामानुजाचार्यं कर्नाटकभाषामयीं सुमहतीं (१३२३ पृष्ठात्मिकाम्) व्याख्यां निबद्धुं प्रेरितवन्तः, काशीनाथग्रन्थमालाया द्वाविंशतितमपुष्परूपेण तां मुद्रापितवन्तश्च। महत्त्वपूर्णोऽयं ग्रन्थः साम्प्रतं समुपलभ्यत इति प्रमोदस्यायं विषयः।

कन्नडव्याख्याकाराः प० देवशिखामणिरामानुजाचार्या ग्रन्थस्यास्य मञ्जरीत्रयरूपेण विभागं कृत्वा प्रथममञ्जर्यां ग्रन्थकारेण पूर्वपक्षरूपेण समुपस्थापितस्याद्वैतसिद्धान्तस्य ब्रह्मसूत्रशाङ्करभाष्य-रत्नप्रभा-कल्पतरुपरिमल-अद्वैतसिद्धि-गौडब्रह्मानन्दीय-पञ्चपादिकाविवरण-संक्षेपशारीरक-सिद्धान्तलेशसंग्रह-तत्त्वप्रदीपिकाद्यनेकग्रन्थाधारेण सम्यक् प्रतिष्ठापनं कृतवन्तः।

द्वितीयमञ्जर्यां पूर्वं प्रतिष्ठापितस्याद्वैतवेदान्तसिद्धान्तस्य श्रीकण्ठभाष्य-श्रीकरभाष्य-क्रियासार-शिवार्कमणिदीपिका-भट्टभास्करीयवेदभाष्य-श्रीभाष्य-श्रुतप्रकाशिका-भावप्रकाशिका-न्यायसिद्धाञ्जन-तत्त्वमुक्ताकलाप-सर्वार्थसिद्धि-भाट्टदीपिका - शास्त्रदीपिका-श्लोकवार्त्तिक-तन्त्रवार्त्तिक-न्यायसुधा-प्रकरणपञ्जिका-मानमेयोदय-शाबरभाष्याद्यनेकग्रन्थाधारेण सम्यङ् निरसनं च कृतवन्तः।

पुनस्तृतीयायां मञ्जर्यां श्रीकरभाष्य-क्रियासार-श्रीकण्ठभाष्य-सिद्धान्तशिखामणि-शैवसिद्धान्तदीपिका - तत्त्वप्रकाशिका-शिवार्कमणिदीपिकाद्यनेक - ग्रन्थैर्वीरशैवीयशक्तिविशिष्टाद्वैतसिद्धान्तं प्रतिष्ठापितवन्तः।

यथा कन्नडभाषायामस्य ग्रन्थस्य विस्तृता व्याख्या वर्तते, तथा संस्कृतेऽपि यदि स्यात् तदोत्तरभारतीयच्छात्राणां महानुपकारो भवेदिति मन्ये। तदर्थं पदवाक्यप्रमाणज्ञैः प्रामाणिकैरेव पण्डितप्रवरैः प्रयत्नः कार्यः।

अधुना च देवनागरीलिप्यां मूलग्रन्थस्याप्युपलब्धिर्नासीत्। खि० श० १९०९ तमे वत्सरे सोलापुरनिवासिना पुण्यश्लोकपदवीभाजा अप्पासाहेबवारदमहोदयेन प्रतिष्ठापितायां वीरशैवलिङ्गिब्राह्मणग्रन्थमालायामस्य ग्रन्थस्य प्रथमं देवनागरीसंस्करणं जातमासीत्। बहोः कालादारभ्य ग्रन्थस्य दुर्मिलत्वात्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालये शक्तिविशिष्टाद्वैतवेदान्ताचार्यपरीक्षायां तृतीयखण्डे पाठ्यग्रन्थरूपेण स्वीकृतत्वाच्च प्रथमतः कथमपि मूलग्रन्थोपलब्धिः स्यादिति विचार्य वीरशैवलिङ्गिब्राह्मणग्रन्थमालायां प्रकाशितपुस्तकाधारेणैवास्य सम्पादनं कृतम्।

अस्य सम्पादनकर्मणि प्रवृत्तस्य मम सम्यग् मार्गदर्शनं कृतवद्भ्यः शैव-शाक्त-तन्त्रादिवाङ्मये विश्वविश्रुतयशस्केभ्यः साम्प्रतं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सांख्ययोग-तन्त्रागमविभागाध्यक्षचरेभ्यः शास्त्रचूडामणिभ्यः श्रीमद्भ्यः प० व्रजवल्लभद्विवेदमहोदयेभ्यः सविनयं सश्रद्धं प्रणामाञ्जलिमुपहरामि। एते महानुभावा मदीयानुरोधेन ग्रन्थस्य विशिष्ट-

स्थलानां तात्पर्यं छात्रोपयोगितोद्देशेन लिखित्वाऽनुगृहीतवन्त इति परमस्य प्रमोदस्यायं विषयः।

अतः परं वेदान्तविद्यागुरुभ्यो निखिलशास्त्रवेत्तृभ्यः शास्त्रार्थकलाविशारदेभ्यः साम्प्रतं सम्पूर्णानन्दसंस्कृतविश्वविद्यालये कुलपतिपदमलङ्कुर्वद्भ्यो डॉ०देवस्वरूपमिश्रमहाभागेभ्यः सविनयं प्रणामाञ्जलिमुपहरामि। एतेषामेव महानुभावानां निरतिशयकृपाविशेषेण ग्रन्थोऽयं पाठ्यपुस्तकरूपेण स्वीकृतः।

अन्ते चाहं काशीज्ञानसिंहासनाधीश्वराणां श्री १००८ जगद्गुरुविश्वेश्वरशिवाचार्यमहास्वामिनां दिव्यचरणारविन्दयोः सश्रद्धं सविनयं च प्रणामाञ्जलिमुपहरामि। एते हि महानुभावा मामस्मिन् कर्मणि संप्रेर्य, स्वाशीर्वचनप्रदानेन चानुगृह्य मदीयां कर्तृत्वशक्तिं परिवर्धितवन्तः।

एतदतिरिक्तं ग्रन्थेऽस्मिन् येषां विदुषां तत्कृतीनां वोपयोगो कृतस्तेभ्यः सर्वेभ्यो वर्तमानेभ्यः प्राचीनेभ्यश्च सश्रद्धं प्रणामाञ्जलिमुपहरामि।

ऋषिपञ्चमी, संवत् २०४३ वि०
८-९-१९८६ ई० वाराणसी

विद्वज्जनविधेयः
चन्द्रशेखरशर्मा हिरेमठः

विषयानुक्रमणी

परिशिष्टानि

———

ॐ

शिवाद्वैतमञ्जरी

स्वप्रभानन्दशिवाचार्यविरचिता

श्रीगुरुबसवलिङ्गाय नमः ।

श्रीनाथं नौमि शान्तं त्रिगुममलमहं शिष्यहृद्ध्वान्तभानुं
मन्मूर्ध्नि द्वादशान्तस्थितसितजलजप्रोद्यदञ्जत्रिकोणे ।
इच्छाज्ञानक्रियाख्ये त्रिविधलिपिलसत्सुत्रिरेखे हृलक्षे
कृत्स्नार्णौन्मुख्यबिन्दौ चिदचिदुदयकृद्दृक्क्रियाङ्घ्रिद्वयाढ्यम् ॥ १ ॥

ब्रह्माद्वैतमनात्मकल्पमितरैराभण्यते तत्पुन-
स्त्वस्तित्वादिविभागतः स्फुटतरं द्वैते सुविश्राम्यति ।
तद्रीतिं प्रतिपाद्य दूषणगणं चापाद्य सद्दृक्क्रियं
तद्ब्रह्मेत्युपपाद्य विश्वमखिलं तद्रूपमाचक्ष्महे ॥ २ ॥

अतः शिवाद्वैतसुमञ्जरी स्याद् विश्वस्थितिस्तत्प्रतिपादनेन ।
युक्ता तदाख्याऽस्य ततस्तनोतु तोषं सदेयं शिवभक्तिभाजाम् ॥ ३ ॥

अत्र वैयासिकेषु विवर्तवादिनो हि व्याससूत्राभिप्रायमित्थं वर्णयन्ति । तथाहि—[१]"युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्ध-स्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतर-भावानुपपत्तिरित्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्यय-गोचरस्य विषयस्य तद्धर्माणां चाध्यासस्तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तम्, तथाप्यन्योन्यस्मिन्नन्योन्यात्मकता-मन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेनात्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञान-निमित्तः सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः । आह—कोऽयमध्यासो नामेति । उच्यते—स्मृतिरूपः परत्र पूर्वदृष्टावभासः । तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति । केचित्तु यत्र यदध्यासस्तद्विवेकाग्रह-

---

१. शाङ्करभाष्यमेतदत्र पूर्वपक्षतया समुद्धृतं द्रष्टव्यम् (पृ० १-२) ।

निबन्धनो भ्रम इति। अन्येऽपि तु यत्र यदध्यासस्तस्यैव तद्विपरीतधर्म कल्पनामाचक्षते। सर्वथापि त्वन्यस्यान्यधर्मावभासकतां न व्यभिचरति तथा च लोके अनुभवः—शुक्तिका हि रजतवदवभासते, एकश्चन्द्रः सद्वितीयवदिति। कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणाम्? सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति, युष्मत्प्रत्ययापेतस्य प्रत्यगात्मनोऽविषयत्वं ब्रवीषि? उच्यते—न तावदयमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वादपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः। न चायमस्ति नियमः, पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति। अप्रत्यक्षेऽप्याकाशे बालाः तलमलिनताद्यध्यस्यन्ति। एवमविरुद्धः प्रत्यगात्मन्यप्यनात्मताध्यासः। तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते, तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः। तत्रैवं सति यत्र यदध्यासः, तत्कृतेन गुणेन दोषेण वाऽणुमात्रेणापि स न संबध्यते, तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि" इत्यादिना [1]"एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः" इत्यन्तेन ग्रन्थेनाध्यासस्वरूपमुपपाद्य प्रत्यक्षादिप्रमाणोपलक्षितनिखिलप्रपञ्चस्याविद्याविषयत्वं प्रतिपाद्य [2]"अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते" इति जडचेतनविभागपूर्वकं प्रतिज्ञाय तत्प्रतिज्ञापूरणायाध्यायचतुष्टयात्मकं शास्त्रं निर्विशेषब्रह्माद्वैतपरत्वेन प्रतिपादितम्।

अत्रेदं चिन्त्यते—अविद्यासद्भावे किं मानमिति? तत्र प्रत्यक्षमुतानुमानमाहोस्विदागमाः किमान्तरीयानुभवो वा उच्यते। तस्या अचाक्षुषत्वे दृश्यकार्यान्यथानुपपत्त्या, "विद्यां चाविद्यां च" इति श्रुतेः, अहमज्ञ इत्यनुभवाच्च अनाद्यनिर्वचनीया ब्रह्माश्रिता जीवविषयिणी भावरूपा काचिदविद्याऽस्तीति निश्चीयत इति चेत्, तत्प्रमाणस्याविद्यायाश्च भेदो वा यद्वाऽभेदो वा? नाद्यः, अविद्यातिरेकस्य विद्यात्वेन तत्प्रमाणस्यापि विद्यैकरूपतावश्यंभावेन तत्त्रिसत्यत्वप्रसङ्गात्। न च तत्प्रमाणस्याविद्याकार्यत्वेन भेदाङ्गीकारान्न दोष इति वाच्यम्, कार्यकारणयोर्भेदे तन्तुघटयोरिव भिन्नस्वभा

१. शाङ्करभाष्यं मूलमात्रम्, पृ० ४

२. शाङ्करभाष्यं मूलमात्रम्, पृ० ४

त्वेनाकारणत्वप्रसङ्गात्, [1]अभेदे सत्येकरूपत्वेन कार्यमिति कारणमिति विभागासंभवात्, भेदाभेदयोर्विरोधेन अनङ्गीकारात्, तत एव मृद्घटदृष्टान्तस्यापि दूरापास्तत्वात्। यदि भेद एवेष्टस्तदा तादात्म्यासंभवात् दण्डनाशेऽपि घटस्थितिरिव कारणीभूताविद्यानिवृत्तावपि तत्कार्यरूपप्रपञ्चनिवृत्तिर्न स्यात्। इष्टापत्तौ मुक्तिरेव न स्यात्, बन्धस्य प्रपञ्चान्तर्गतत्वात्। नापि द्वितीयः, प्रमाणप्रमेययोरभेदादिदं प्रमाणमिदं प्रमेयमिति विभागासंभवात्। यदि स्वसद्भावे स्वयमेव प्रमाणम्, तदा[2] स्वप्रकाशतापत्तिः, आत्मवदन्यनिरपेक्षतया भासमानत्वात्। नहि कश्चिद् व्यवहरन् स्वसद्भावे प्रमाणमिच्छति। यदि साऽपीष्टा, तदा विद्यैव स्यात्, अविद्येति वार्तैव न स्यात्। विद्याऽपि न तत्र प्रमाणं भवितुमर्हति, तस्यास्तावन्निरञ्जनत्वेन चैत्योपराग-

---

१ न च मृद्घटयोरिव संभवतीति वाच्यम्, तन्तुपटयोरिव मृद्घटयोरात्यन्तिकभेदशून्यत्वात्, तन्तुवन्मुख्यकारणत्वप्रसङ्गात्, अतो दृष्टान्तस्य वैषम्यात्। न च तन्तुघटयोरिव मृद्घटयोर्भेदाविशेषेऽप्यन्वयव्यतिरेकाभ्यां घटं प्रति मृद एव कारणत्वं निश्चीयत इति वाच्यम्, तादृगन्वयव्यतिरेकसिद्धकार्यकारणभावस्तावन्मृद्घटयोः किंनिबन्धन इत्यन्वेषणीयत्वात्। न चाविनाभावादिसंबन्ध एव नियामक इति वाच्यम्, सोऽपि किंनिबन्धन इत्यन्वेषणीयत्वात्, तन्तुपटयोरिव मृद्घटयोरपि भेदविशेषात्। तस्मादनन्यगतिकत्वेन मृद्घटयोर्भेदाभेद एव शरणीकरणीयः। स च भवतां नेष्ट इति। न च भेदाभेदयोर्विरोधात् कथं भेदाभेदस्तयोरङ्गीकर्तुं शक्यत इति वाच्यम्, अन्यथानुपपत्तेर्बलीयस्त्वात्, मृदेव घटाकारेण भातीति मृद्घटो न संभवतीति परिहर्तुमशक्यत्वात् यदि घटो नास्तीत्यपि वक्तुं न शक्यत्वाद् मृदः कुम्भो जायत इत्यादिव्यवहारे वर्तमानकालरूढजनिक्रियाया निराश्रयत्वप्रसङ्गात्, जन्मकाले घटाभावादुत्पत्त्यसंभवत्वात्। तस्मान्मृदादिहेतुवस्तुषु कार्यसामरस्यं नास्तीत्यङ्गीकरणीयत्वेन दण्डघटयोरिवात्यन्तिकभेदासंभवेन सामरस्याभेदस्यैवाङ्गीकरणीयत्वात्। अन्यथा दण्डघटदृष्टान्तेन कारणीभूताविद्यानिवृत्तावपि तत्कार्यनिवृत्तिर्न स्यात्। तस्मात् कार्यकारणयोर्भेदाभेदाङ्गीकारेण विना कार्यकारणभावासंभवाद् भेदाभेदस्यानभिभवत्वाद् उक्तरीत्या विद्यातिरिक्तस्य विद्यात्वेन तत्कार्यताया असंभवाच्च। (अन्यग्रन्थे लब्धोऽयं विषयः)।

२, आत्माश्रयदोषापत्तेरिष्टापत्तौ।

शून्यत्वात्, असावविद्येति स्फुरणासंभवात् । तस्मादविद्यासद्भावे मा
मन्वेषणीयम् ।

अथ द्विसत्यत्वप्रसङ्गादप्यविद्याङ्गीकारो न संभवति, ब्रह्मातिरि
काचिदविद्या नास्तीत्यङ्गीकरणीयत्वात् । न चाधिष्ठानगतसत्त्वैवावि
तत्कार्ये च प्रतिभातीति नोक्तदोष इति वाच्यम्, सदसतोः सत्यामवि
सा सत्ता भासते वा यद्यसत्यां वेति विकल्पात् । तत्र नाद्यः, पूर्वमेव स
स्थितत्वात् पुनः सत्तान्तरसंबन्धानपेक्षणात् । नापि द्वितीयः, असतः स
संबन्धासंभवात् सदसतोर्विरोधात् । न चाविद्या सदसद्विलक्षणेति नोक्त
इति वाच्यम्, तद्रूपेणापि सत्यामसत्यां वेति विकल्पे पूर्वोक्तदोषस्यैवानुवृ

अथ यथाकथञ्चिदविद्याङ्गीकारेऽपि ब्रह्माविद्ययोराश्रयाश्रयिभावो
संभवति, तयोस्तेजस्तिमिरयोरिव विरोधात् । न चोलूकनेत्रतेजस्यन्धका
क्रान्तत्वेन तेजस्तिमिरयोः सर्वत्र विरोधाभावात् तद्वत् संभवतीति वाच्
"दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे । केचिद् दिवा तथा रा
प्राणिनस्त्वल्पदृष्टयः ॥" इति सप्तशत्यां स्मृतत्वेन तस्याल्पदृष्टित्वेन सं
तेजोभिभूतत्वेन वेद्यग्रहणापाटवत्वात् । अन्यथा रात्रावपि चन्द्रचन्द्रिका
वेद्यदर्शनशून्यत्वेन सदान्धः स्यात्, तस्य दिवान्ध इति व्यपदेश एव
स्यात् । नापि चन्द्रकलङ्कन्यायेन संभवति, ब्रह्मणस्तावन्निरंशत्वेन ऊर्
धस्तिर्यग्भागभेदशून्यत्वात् । यदि तयोरविरोधस्तदाऽविद्यायास्तत्त्वदर्शना
निवृत्तिर्न स्यादविरोधादेव, "अविरोधितया कर्म नाविद्यां विनिवर्तये
इत्युक्त्या ब्रह्मणोऽज्ञत्वप्रसङ्गश्च । अन्धकाराक्रान्तगृहवन्नाप्यंशतः, त
निरंशत्वादविद्याकल्पितांशभेदोऽपि न संभवति, कल्पनायाः प्रागवस्था
संभवात्, ब्रह्मबाह्यदेशस्यैवाभावात्, उक्तरीत्या तत्रैव स्थितेरसंभवात् ।

अथानिर्वचनीयत्वमपि न संभवति, अनादिभावत्वेन निर्वचनीयत्वा
अनादित्वमपि न संभवति, घटादिवत् सांशत्वेन जडत्वेन च स्वतःसिद्ध
संभवादङ्गीकारे स्वप्रकाशतापत्तिः । परतः सिद्धत्वे घटादिवत् कार्य
कारणान्तरान्वेषणमुखेनानवस्थाप्रसङ्गात् । अथ भावरूपत्वमपि न संभव
नञर्थोल्लिखितत्वात् । अथ विश्वोपादानत्वं च न संभवति, स्वसत्ताशू
त्वात्, जडत्वेन प्रेरकत्वाभावाच्च । चेतनस्य निःसङ्गत्वेन तदसंभवा
न चायस्कान्तदृष्टान्ते चैतन्यसांनिध्यवशादविद्यायाः कारणत्वं संभवती
वाच्यम्, भिन्नदेशस्थितयोरेव सांनिध्यनियमात्, तद्दृष्टान्तात् तद्वद् ब्रह्मबा

देशाभावात्, ब्रह्मण्येव स्थितायास्तु लोहमणिप्रविष्टसूचेरिव निर्व्यापारत्वात्, विश्वाकारेण परिणमनक्रियासंभवात्। यदि निराश्रयैव कार्यं जनयेत्, तदा स्वतन्त्रतापत्त्या दुर्निवार्या स्यात्, इष्टापत्तौ मुक्तिरेव न स्यात्।

अथ जीवविषयकत्वं च न संभवति, तस्यास्तावज्जडत्वेन विषयत्वात्, जीवस्य चेतनत्वेन विषयत्वात्, अतो वैपरीत्यात्। अङ्गीकारेऽपि जीवस्याविद्याक्रान्तहृदयत्वेन नित्यानित्यवस्तुविवेक एव न स्यात्। नापि गुरुतः शास्त्रतश्च, गुरोरप्यविद्याक्रान्तहृदयत्वात्, शास्त्रस्याविद्याकार्यत्वेन तदेकरूपत्वात्। तस्मादविद्यासद्भावे मानाभावः। यथाकथञ्चिदङ्गीकारेऽपि द्विसत्यत्वप्रसङ्गात्, ब्रह्माविद्ययोस्तेजस्तिमिरयोरिव विरोधेन आश्रयाश्रयिभावासंभवात्। अविरोधे निवर्त्यनिवर्तकभावासंभवात्, ब्रह्मणोऽज्ञत्वप्रसङ्गात्, अविद्याया अनादित्वासंभवात्, भावरूपत्वासंभवाद् ब्रह्मणस्तत्प्रेरकत्वासंभवात्। अत एव विश्वोपादानत्वासंभवाज्जीवविषयकत्वासंभवादङ्गीकारे तस्य नित्यानित्यवस्तुविवेकासंभवाच्च। "अस्यानर्थहेतोः प्रहाणाय सर्वे वेदान्ता आरभ्यन्ते" इत्युक्तमयुक्तमेव, वेदान्तानां तदारम्भस्य चाविद्यैकरूपत्वेन अविरोधितया तन्निवर्तकत्वासंभवादिति भावः।

अथ स्मृतिरूपः परत्र पूर्वदृष्टावभास इत्युक्ताध्यासलक्षणं च न संभवति, तथाहि पुरोर्वर्तिरज्ज्वादि बाह्यवल्मीकादिप्रदेशे संदृष्टभुजङ्गादि पुरोवर्तिरज्ज्वादावारोप्यत इति दृष्टत्वात्। तथात्र ब्रह्मबाह्यदेशस्याभावात्। लोके तत्रैव दृष्टस्य तत्रैवारोपस्य क्वाप्यदर्शनात्। शङ्खपीतिमाध्यासे पीतिम्नोऽन्यत्र दृष्टत्वात्। अन्यथा शङ्खः पीत इति न स्फुरेत्, पूर्वं पीतादर्शनात्। अन्यथा भ्रमप्रमाविवेक एव न स्यात्, तत्रैव दृष्टस्य तत्रैवाङ्गीकारादारोपस्य। न चोत्तरक्षणबाध्यमानत्वमेव भ्रमत्वमिति वाच्यम्, घटपटयोरिव शुक्तिरजतयोरपि वस्तुत्वेन बाध्यबाधकभावासंभवात्। नापि शुक्तिज्ञानेन रजतज्ञानस्य बाधः, घटपटज्ञानयोरिव तयोर्भिन्नकालभिन्नविषयत्वात्। अन्यथा घटज्ञानेन पटज्ञानमपि बाध्येत। न च नेदं रजतं शुक्तिरेवेत्यौत्तरकालिकज्ञानं पुरोत्पन्नरजतज्ञानस्य बाधकमित्युच्यत इति वाच्यम्, घटज्ञानानन्तरं घटं त्यक्त्वा पटं पश्यतः प्रमातुर्नायं घटः पट एवेति निश्चयोऽपि पुरोत्पन्नघटज्ञानस्य बाधकः स्यादिति सर्वस्यापि विकल्पस्य प्रतियोगिनिषेधपूर्वकनिश्चयरूपत्वात्। न च तादृग्विकल्पस्य भिन्नधर्मिकत्वेन विरोधाभावान्न तत्र बाध्यबाधकभावः, इह तु एकस्मिन्नेव धर्मिणि इदं रजतं नेदं रजत-

मिति विरुद्धावभासद्वयस्य प्रामाण्यासंभवादौत्तरकालिकरजताभावज्ञाने पुरोत्पन्नरजतज्ञानस्य बाधोऽङ्गीक्रियत इति वाच्यम्, बाध्यबाधकभाव दण्डभाण्डनयेन परस्परान्वयसापेक्षत्वेन तदभावात्, तयोर्भिन्नकालीनत्वात्

ननु ज्ञानानां त्रिक्षणावस्थायित्वनियमेन रजताभावज्ञानोत्पत्तिक्ष विनश्यदवस्थापन्नपुरोत्पन्नरजतज्ञानस्य विद्यमानत्वात् तयोः परस्परान्व संभवति? इति चेन्न, ज्ञानानां गुणत्वेन संयोगेन समवायेन वा तयोः परस्प समन्वयाभावात्, जडत्वेन तादृग्गौन्मुख्यशून्यत्वाच्च बाध्यबाधकभावो संभवत्येवेति, किन्तु घटं त्यक्त्वा पटं पश्यतः प्रमातुरिच्छावशाद् घटज्ञान निमेषः, पटज्ञानस्योन्मेष इतिवद् एकस्मिन्नेव धर्मिणि सान्निध्यवशान्नील त्वादिविशेषं पश्यतो दूरत्वादिनोद्भूतप्राक्तनरजतज्ञानस्य निमेषः, नेदं र शुक्तिरेवेत्यौत्तरकालिकज्ञानस्योन्मेष इत्यङ्गीकरणीयत्वेन तुल्यत्वात् अथार्थक्रियायोग्यत्वमेव भ्रमत्वमिति चेन्न, गगनकुसुमादिनित्याभावपदा स्यापि भ्रान्तत्वप्रसङ्गात्, अर्थक्रियायोग्यत्वात्, तस्यापि भ्रान्तत्वे शु रजतादिवदिदमिति नेत्रगोचरता स्यात्। गगनकुसुमादेरपि—"सम पदविधिः" इति शब्दानुशासनवशादेकार्थीभावलक्षणसामर्थ्यंकृतसमासयोग वस्तुत्वमङ्गीकरणीयमेव। योग्यायोग्यतयोः प्रभुसृष्टेर्विचित्रत्वात्, स्वातन्त्र परिकल्पितशुक्तिरतमभावनिबन्धनत्वात्, "सत्यं चानृतं च सत्यमभव इति श्रुतेः, "सदसच्चाहमर्जुन" इति स्मृतेश्च सर्वस्यापि सच्चिन्मुद्घनत्वात्

अथ युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोरित्यत्र तत्कृतजडचेत विभागोऽपि न संभवति। तथाहि—अस्मत्प्रत्ययव्यतिरेकेणानुभूयमानसुखा वत् तद्गोचरस्य कस्यचिददृश्यत्वात्, अस्मत्प्रत्ययस्य मिथ्यात्वात्। प्रत्यय सविषयताऽन्यथानुपपत्त्याऽनुमीयते चेदनुमातुरप्यदृश्यत्वात्। तस्मात् तदा मतचैतन्यस्य वन्ध्यापुत्रप्रायत्वेन अस्मत्प्रत्ययविषयत्वादपरोक्षत्वा प्रत्यगात्मप्रसिद्धेरित्युक्तेरतितुच्छत्वात्। अथ युष्मप्रत्ययगोचरस्य जड मपि न संभवति, चैत्रमैत्रयोर्विवादे जाते परस्परतत्प्रयुक्तत्वंकारेण तयोर प्रकारकबोधस्यैवोपलब्धेश्चेतनविषयकत्वात्, जडस्येदंप्रत्ययगोचरत्वा "इदं सर्वमसृजत्", "इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते" इत्यादिप्रमा बलाच्च किं जडस्य त्वंप्रत्ययगोचरत्वे "तत्त्वमसि" इत्युपदेशो जडं प्रत्ये स्यात्। तस्मात् त्वमहंप्रत्यययोश्चैतन्यैकविषयकत्वाद् इदमहमिति वक्त युष्मद्ग्रहणमत्यन्तभेदोपलक्षणार्थमिति वदन्नपि प्रत्युक्तः, तयोश्चैतन्यैकविषय

कत्वेनात्यन्ताभेदात्, "न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः। न चैव न भविष्यामः सर्वे वयमतः परम् ॥" इति भगवता वयमित्युत्तममध्यम-प्रथमाख्यपुरुषत्रयस्याप्यस्मत्प्रत्ययान्तर्गतत्वेन क्रोडीकृतत्वाच्च। अत एव त्वमहंप्रत्ययगोचरयोर्विषयविषयिभावोऽपि न संभवति, वैजात्याभावात्, चैतन्यस्य चैतन्यान्तरागोचरत्वात्, चैतन्यगोचरघटादिवज्जडत्वप्रसङ्गात्।

न च व्यवसायं प्रत्यनुव्यवसायस्य प्रामाण्याङ्गीकारान्नायं नियम इति वाच्यम्, व्यवसायस्य व्यवसातरि विश्रान्तत्वेन ज्ञानस्य घटादिवत् कदापीदमित्यप्रतीयमानत्वेन सदा प्रमेयपदवीमुत्तीर्णत्वात्, व्यवसायानुव्यवसाययोर्घटस्यैव विषयत्वात्, अनुव्यवसायस्य व्यवसायप्रतिभातघटहृदयङ्गमीभाव-रूपत्वात्, मया घटोऽयं ज्ञात इति। अन्यथा घटे घटान्तरस्यापि प्रामाण्य-मङ्गीकरणीयं स्यात्। यदि घटत्वावच्छिन्नघटस्येदमिति सदा प्रमेयपदनिष्ठ-त्वेन कदापि तदुत्तीर्णताभावाद् घटे घटान्तरं न प्रमाणमिति चेदत्रापि तौल्यात्, ज्ञानस्य ज्ञातृप्रविश्रान्तत्वेन कदापीदमिति प्रमेयपदप्रविष्टत्वाभावा-दिति। तस्मात् सजातीयपदार्थयोर्विषयविषयिभावो न संभवत्येव। अन्यथा प्रमाणमिति, प्रमेयमिति व्यवस्थैव न स्यात्, प्रमाणरूपप्रमितेरपि प्रमेय-ताङ्गीकारात्। प्रमितिः प्रमाणमित्यप्यङ्गीकृतत्वात्।

एवमात्मनोऽपि प्रमेयत्वं न संभवति, प्रमातृत्वात्। अन्यथा तस्यापि प्रमेयत्वे प्रमात्रन्तरसापेक्षत्वेनानवस्थाप्रसङ्गः स्यात्, प्रमेयप्रमात्रोर्भेदघटित-त्वात्। अत एव त्वमहंप्रत्ययगोचरयोर्विरोधोऽपि न संभवति, चैतन्यैकरूप-त्वात्, तेजस्तिमिरयोरिव विरोधाभावात्। यदि त्वंप्रत्ययस्य लक्षणयेदंरूप-त्वमेव विवक्षितम्, तदापीदंप्रत्ययगोचरस्य जडस्य मयाऽवलोक्यते ममाव-भासत इत्यात्मप्रकाशारूढतया भासमानत्वान्न तयोर्विरोधः। एवं तेजस्तिमि-रयोरपि न विरोधः, तयोरप्यात्मप्रकाशमवलम्ब्य भासमानत्वात्। अन्यथा तयोर्विरोध इति स्फूर्तिरेव न स्यात्, "तस्य भासा सर्वमिदं विभाति तमेव भान्तमनुभाति सर्वम्" इति श्रुतेश्च। नापि तयोरितरेतरभावानुपपत्तिः, स्मृत्यन्यथानुपपत्त्या प्रमेयस्य प्रमाद्वारा प्रमातृविश्रान्तेरङ्गीकरणीयत्वात्। संस्कारादेव स्मृतिः संभवतीति चेत्, तस्यापि सविषयत्वेनैवात्मविश्रान्त-त्वात्। न चानुभूतघटस्य नष्टत्वेन सहात्मविश्रान्तेरसंभवात् तद्विषयता-साहित्यमात्रेणानुभूतपदार्थविषयिणी स्मृतिः संस्कारात् संभवतीति वाच्यम्, विषयताया विषयधर्मत्वेन तेन विना तत्साहित्यासंभवात्। यदि तयोरैक्यो-

पपत्तिर्न स्यात्तदा घटोऽयमिति न स्फुरेत्, तेजोबाह्यान्धकारवत् प्रकाशबाह्
त्वात्। न च तेजोबाह्यघटवत् प्रकाशविषयत्वं संभवतीति वाच्यम्, "आत्
आकाशः संभूतः" इत्यादिश्रुतेरुत्तरोत्तरभूतस्य पूर्वपूर्वभूतकार्यत्वे
मृद्घटन्यायेन परम्परायास्तयोस्तादात्म्यात्।

अपि च, अन्तःकरणावच्छिन्नत्वे चैतन्यस्यान्तःकरणप्रदेशमात्रनिष्ठत्वा
विषयावच्छिन्नचैतन्यस्य विषयप्रदेशमात्रनिष्ठत्वादुभयोः संबन्धाभावात्। नः
वृत्तिद्वारा संभवतीति वाच्यम्, चैतन्यस्य त्रैविद्याङ्गाकारेण वृत्तिविषय
वच्छिन्नचैतन्ययोरेकलोलीभावेऽप्यन्तःकरणावच्छिन्नशारीरकस्य विषय
वच्छिन्नचैतन्येनैकलोलीभावाभावात्, तस्य परिणामित्वेनान्तःकरणेन स
बहिर्निर्गमनासंभवात् प्रदेशभेदेन चैतन्यभेदाद् भेददर्शनेऽपि ज्ञानस्यात्
गुणत्वेन परकीयगुणद्रव्यैः संयोगेन समवायेन वा संस्पर्शाभावादेव नीलाः
विषयत्वासंभवाज्ज्ञानस्य विषयित्वासंभवात्।

एवं चोक्तरीत्या नित्यानित्यवस्तुविवेकशून्यत्वेन स्वशास्त्रस्य वैयर्थ्य
प्रसङ्गात् तादृशाधिकार्यभावात् तस्मात् तन्मते जडचेतनविभागशून्यत्वात्
अत एव जीवेश्वरविभागासंभवात्, अत एव बन्धमोक्षव्यवस्थाया गगन
कुसुमायमानत्वात् तदभिमतान्तःकरणविशिष्टस्य शारीरकस्याधिकारि
नित्यानित्यवस्तुविवेकशून्यत्वाद् ब्रह्मणो निर्विशेषत्वेनास्मिन् प्रकाशे नन्द
मोत्युत्तमान्तर्गताकर्मकाक्रमस्वसत्तामुक्तास्फुरणशून्यत्वेन स्फटिकादिप्रकाश
वज्जडत्वात् तत्त्वज्ञानेन प्रपञ्चस्य बाधाङ्गीकारेण छान्दोग्योपदिष्टैकविज्ञानो
दितसर्वविज्ञानप्रतिज्ञाभङ्गप्रसङ्गात्, "अथातो ब्रह्मजिज्ञासा" इत्यत्र निर्वि
शेषब्रह्मण एव जिज्ञास्यत्वेनोद्दिष्टत्वात् समनन्तरसूत्रोक्ततदसाधारणज
ज्जन्मादिलक्षणमप्यसङ्गतं स्यात्, तस्य कर्तृत्वादिशून्यत्वादनुद्दिष्टपदार्थलक्षण
कथनस्य शास्त्रकृद्भिरनङ्गीकृतत्वात्, अत एव शास्त्रयोनित्वादित्याद्युत्तरशास्त्र
प्रवृत्तेः कुण्ठितत्वात् प्रामाणिकैर्विद्वद्भिस्तदुक्तमनादरणीयमिति संक्षेपः।

नन्वेवं चेत् कथमद्वैतवादनिर्वाहः, विश्वोपादानकारणीभूतमिथ्याप्रत्यय
रूपाविद्याया अनङ्गीकारात्, ब्रह्मणो निर्विकारत्वेन परिणमनासंभवात्
विकारित्वादिदोषप्रसङ्गात्, प्रकाशबाह्योपादानकारणान्तरस्याङ्गीकारो न
संभवत्येव, अद्वैतसिद्धान्तविरोधादिति चेत्, इत्थमालोचनीयम्—"सन् हृदय
प्रकाशो भवनस्य क्रियाया भवति कर्ता। सैव क्रिया विमर्शः स्वस्था क्षुभित

च विश्वविस्तारा" ॥ इति सारस्वतसूत्रस्थित्या हृदयप्रकाशः "हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्" इति श्रुतेश्चराचरप्रपञ्चभित्तिभूतात्मप्रकाशः सन् अस्तीत्यङ्गीकरणीयः। अन्यथा जगदान्ध्यमापतेतेति स्वसत्ताहानिप्रसङ्गात्, "असन्नेव स भवति असद् ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः ॥" इति श्रुतेस्तदुपजीव्यत्वात्। "अस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः स हृदयप्रकाश एवास्तीति भवनक्रियाश्रयत्वात् कर्ता भवति। सैव क्रिया स्वस्था चेच्चिदानन्दमात्रविश्रान्ता चेत्, अस्मिन् प्रकाशे नन्दामीति विमर्शः, अन्यथा स्फटिकादिप्रकाशवज्जडत्वप्रसङ्गात्। क्षुभिता चेत् सृष्ट्युन्मुखा चेत् "दृश्यते तु" इति ब्रह्मसूत्रस्थित्या गोमयादेर्वृश्चिकाद्युत्पत्तिरिव शिवादिभूम्यन्तषट्त्रिंशत्तत्त्वात्मकविचित्रविश्वस्फुरणमयी भवतीति। तथाहि—"परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतिस्थाऽनुक्तार्थप्रकाशकचकारचमत्काराद् महेश्वरस्वभावभूतपराशक्तेश्चिदानन्देच्छाज्ञानक्रियादिनानारूपतावगमात्।

न च—"कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" इति श्रुतेरिच्छादीनां मनोधर्मत्वादत एव शारीरकनिष्ठत्वेनानुभूयमानत्वात् कथमात्मस्वभावतेति वाच्यम्, नैयायिकादिभिरशरीरस्यापि ईश्वरस्य गुणत्वेनेच्छादीनामङ्गीकृतत्वाद् घटादिभिश्चाविशेषप्रसङ्गात्। किञ्च, जिज्ञासा बन्धमोक्षाणां सामानाधिकरण्यनियमान्मनसस्तद्विशिष्टस्य वा मुक्तिप्रसङ्गात्, द्वयोरपि मिथ्यात्वात्। जिज्ञासा बन्धविशिष्टस्य तद्विशेष्यांशे मोक्ष इत्यपि वक्तुं न शक्यते, वैयधिकरण्यप्रसङ्गाद् विशिष्टविशेष्ययोरैक्ये मिथ्यात्वेन मोक्षाक्षमत्वात्। तस्मात् कृत्रिमप्रमातुरिच्छादेर्मनोभिव्यक्तताप्रतिपादने श्रुतेस्तात्पर्यमित्यङ्गीकरणीयत्वेन विरोधाभावात्, "तस्मिन् कामाः समाहिताः" इति श्रुत्यन्तरे सम्यक्पदस्वारस्येनात्मस्वभावतावगमाच्च।

एवं स्थिते तत्र चिदानन्दयोर्न कदाचिद् विक्षोभः, अक्रमस्वभावत्वात्, इच्छादिशक्तीनां सक्रमाक्रमरूपत्वेन विक्षोभभाक्त्वात्। न च सक्रमाक्रमयोर्विरोध इति वाच्यम्, वदतो व्याघातात्, भेदाभेदयोर्विरोध इति ज्ञात्वैव वक्तव्यत्वेन तज्ज्ञाने भेदाभेदरूपविषययोर्भासमानत्वात्तस्य सविषयत्वादन्यथा विरोधस्फूर्तिरेव न स्यात्। तस्मात् प्रकाशस्य प्रतियोग्यभावात् किञ्चान्योन्याभावनिबन्धनभेदस्यैवाभेदेन विरोधः। न वयं तादृशभेदं ब्रूमः, तस्यासंभ-

वात्, तत्रान्यत्वस्य पदार्थस्वभावतानुपपत्तेः, पदार्थस्य पदार्थान्यत्वप्रसङ्गात्, न च पदार्थस्य पदार्थान्तरान्यत्वं स्वभाव इति नोक्तदोष इति वाच्यम्, तस्य विशेषघटितत्वेनाप्रश्नविषयत्वात्, भेदसामान्यलक्षणप्रविष्टान्यत्वस्यैव प्रश्नविषयत्वात्। किञ्च, घटान्यत्वं पटस्वभावः पटान्यत्वं घटस्वभाव इत्यसाधारणप्रतीतिर्घटपटयोर्भेदे सिद्धे सत्येवोपपद्यत इति तस्याद्याप्यभिलष्यमाणस्वभावत्वात्। न च तन्तुमयत्वमृण्मयत्वादिना तयोर्भेदस्य सिद्धत्वादिति वाच्यम्, घट एव मृण्मयत्वं पट एव तन्तुमयत्वमिति निश्चयस्यापि घटपटभेदसिद्ध्यनन्तरभावित्वात्। किञ्च, तन्तुमयत्वमृण्मयत्वयोरपि भेदस्तावत्तदवयवभेदात्तदवयवभेदस्तदवयवभेदादिति परमाणुपर्यन्तपर्यालोचनायां निरंशत्वादतीन्द्रियत्वाच्च तत्र भेदाग्रहान्मूलक्षयकार्यनवस्थाप्रसङ्गात्।

न चान्यत्वं भेदनिबन्धनः कश्चिदुपाधिः, भेदस्य मनोरथायमानत्वेन आत्माश्रयादिदोषप्रसङ्गात्, किन्तु स्वर्णकुण्डलन्यायेन विभागो भेद इति ब्रूमः। तत्र कुण्डलं स्वर्णं न भवतीति परिहर्तुमशक्यत्वात्, स्वर्णार्थिनः कुण्डले प्रवृत्तिदर्शनात्। एवं स्वर्णमपि कदापि कुण्डलं न भवतीति परिहर्तुमयुक्तम्, कुण्डलयोग्यत्वात्, कुण्डलाकारेण स्वर्णस्यैव भासमानत्वात्। स्वर्णकुण्डलं नास्तीत्यपि वक्तुं न शक्यते, स्वर्णात् कुण्डलं जायत इत्यादिव्यवहारे वर्तमानकालारूढजनिक्रियाया निराश्रयत्वप्रसङ्गाज्जन्मकाले कुण्डलादिवस्तुस्थित्यभावात्। अस्ति चेदुत्पत्त्यसंभवात् स्थितत्वात्, यद्युत्पन्नवस्तुस्थित्यभावेऽप्युत्पद्यमानवस्तुस्थित्यङ्गीकारे व्यक्ततया स्थित्यसंभवादुक्तदोषात्, अव्यक्ततया स्वकारणाभेदेन कुण्डलादिवस्तुस्थितेरङ्गीकरणीयत्वात्।

एवं स्थिते विभागनिबन्धनभेदस्याभेदेन विरोधाभावात्, तस्मादेव विभज्यमानत्वेन तदुपजीव्यत्वात्, चित्रिककौशल्यवशादालेख्यविशेषे गजवृषभयोः प्रतिभास इवाहिकुण्डलमिव ब्रह्मणः स्वतन्त्रत्वेन शक्तिशक्तिमद्रूपतया भासमानत्वादत एव तस्य चेतनत्वात्, चेतन इत्यत्र प्रत्ययस्य भावार्थकत्वेन अनभिव्यक्तक्रियारूपधात्वर्थाभिव्यञ्जकत्वात्, क्रियायाः साश्रयत्वनियमेन तदाश्रयस्य कर्तुरपि तेनैवाक्षिप्तत्वात्, तदन्तर्गतक्रियायाः कृतिरूपत्वात्, कृतेः सविषयत्वात्, चित्स्वभावत्वेन कृतेः स्वप्रकाशत्वादेवंविधस्वतन्त्रप्रकाशताशक्तेः प्रकाशैकरूपत्वात्। अत एव विभागस्य संयोगपूर्वकत्वाद् ब्रह्मणि प्रपञ्चसंबन्धाभावान्निष्प्रपञ्चत्वाद् वैभासिकभेदो न संभवतीति शङ्काकलङ्कस्यानवकाशात्, "नेह नाना" इति श्रुतेः प्रापञ्चिकभेदनिरासपरत्वाद् विमर्शशक्तेः

सकलसामरस्यात्मकत्वाद्भेदेन स्थित्यसंभवात्तस्याः समवायसंयोगान्यतरसंबन्धसापेक्षत्वाद् गुणगुणित्वाद्यनङ्गीकारेण समवायस्यासंभवात्, संयोगस्य क्रियापूर्वकत्वादन्यतरोभयकर्मजश्च संयोगस्तावद्भिन्नदेशस्थितयोरेवोपपद्यत इति ब्रह्मबाह्यदेशाभावेन तदसंभवादक्रियापूर्वकसंयोगस्याप्रसिद्धत्वात्,

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी ॥

इति श्रुतेर्व्योमादीनां न कार्यकोटिप्रविष्टत्वेन परमाण्वाकाशसंयोगदृष्टान्तस्यापि दूरापास्तत्वादनुभयवादिसिद्धत्वात्, सदा परभारवाहकत्वेन स्वातन्त्र्यभङ्गप्रसङ्गात्, संबन्धस्यैकत्वेन द्विनिष्ठतासंभवान्निरंशत्वात्, सांशत्वे द्रव्यत्वापत्त्या संबन्धित्वेन तस्यापि संबन्धान्तरान्वेषणमुखेनानवस्थाप्रसङ्गाच्च निष्कलमित्यादिश्रुतेः स्वव्यतिरिक्तप्राकृतहेयकलादिराहित्ये तात्पर्यम्, अन्यथा त्वचेतनत्वप्रसङ्गात्, स्फटिकादिप्रकाशवन्निर्विमर्शत्वादिति सूचितत्वात् । तस्माद् ब्रह्मणश्चेतनत्वात् "स वै नैव किमेतस्मादेकाकी न रमते स द्वितीयमैच्छत् स एतावानास तत्सृष्ट्वा तदेवानुप्राविशत्तदनुप्रविश्य सच्च त्यच्चाभवत्" इति श्रुतेः, "लोकवत्तु लीलाकैवल्यम्" इति ब्रह्मसूत्रस्थितेश्च स्वक्रीडार्थं विश्वभवननिर्माणे स्वातिरिक्तकारणान्तरसापेक्षत्वे कुलालादिवत् स्वात्मौन्मुख्यविगलनेनान्यत्रौन्मुख्याददृष्टादिपरतन्त्रत्वेन अनीश्वरत्वप्रसङ्गात्, स्वातिरिक्तकारणान्तरनैरपेक्ष्येण ईप्सितार्थप्रदचिन्तामण्यादिवद्योगी ऊर्णनाभवच्च मयूराण्डरसगतपादपक्षादिवर्णवैचित्र्यन्यायेन तादात्म्येन चिद्व्याप्तिरूपत्वेन स्वतन्त्रतालक्षणस्पन्दनरूपत्वेन चिदुज्ज्वलरूपत्वेन चिदाप्यायनरूपत्वेन चिद्रूपत्वेन च स्वात्मामलमुकुरमण्डलतादात्म्यापन्नविमर्शशक्तिक्रोडीकृतव्योमादिपञ्चप्रमेयविश्वादिचतुरात्मलक्षणजडाजडात्मकं विश्वं स्वेच्छाशक्तिरूपापोहनटङ्कवशात् शिवादिधरण्यन्तषट्त्रिंशत्तत्त्वात्मना विचित्रीकृत्य सृष्टिस्थितिसंहारबन्धमोक्षलक्षणपञ्चकृत्यमहानाट्यरसिकः सन् क्रीडत इति राद्धान्तः, इच्छाशक्तेः सविषयत्वाद् विश्वस्यान्तःस्थितिं विना तदुन्मेषानुपपत्तेः ।

ननु विश्वस्य ब्रह्माभेदेन सत्ताङ्गीकारेण नित्यत्वात् तदन्तर्गतबन्धस्यापि तथात्वेन तस्य तत्त्वज्ञानादपि निवृत्त्यसंभवेन मुक्तिर्न स्यात्, मुक्तस्यापि बन्धप्रसङ्गः, प्रपञ्चस्य षड्भावविकारभाक्त्वेन ब्रह्मणस्तदभेदेन नित्यत्वप्रसङ्गश्चेति चेत्, उच्यते—घटो नश्यतीत्यत्र नाशक्रिया न घटनिष्ठा भवितुमर्हति, स्वत एव नाशासंभवात् कालकरणाधीनत्वात् करणानां कर्मेन्द्रियसापेक्ष-

त्वात्, तेषां ज्ञानेन्द्रियसापेक्षत्वात्, तेषामन्तरिन्द्रियसापेक्षत्वात्, तस्य कृत्रिम-प्रमातृसापेक्षत्वात्, तस्य देशकालादिपरतन्त्रत्वेन स्वातन्त्र्येण विना न संभव-तीति तस्यास्तन्निरूपितत्वेन तन्निष्ठताया अकामेनाप्यङ्गीकरणीयत्वेन कर्तृ-महेश्वरस्वभावत्वात्, दर्शितदिशा कार्यस्य कुण्डलादेः स्वर्णादिकारणात्मना स्थितेरङ्गीकरणीत्वेन कार्यस्य कार्यनाशस्य कारणात्मना स्थितिरूपत्वान्न विकारित्वादिदोषप्रसक्तिः, दुग्धादौ परिणनक्रियायाः कालकरणकर्तृसापेक्ष-त्वेन दृष्टतया कर्तृस्वभावत्वात्, गुणदोषयोरपि स्वात्मैकरूपत्वात्। किञ्च, लोके परिणामिवस्तुषु न सर्वत्र सर्वात्मना स्वदोषपरित्यागः, स्वर्णादि-परिणामिद्रव्यस्य कुण्डलाकारेण परिणतौ स्वर्णादिरूपतापरित्यागस्यानुभूय-मानत्वात्, इतोऽपि स्वतन्त्रभूतवस्तुपरिणमनस्य कूर्माङ्गभङ्गीन्यायेन विकार-लेशस्याप्यसंभवात्। क्रिया हि कर्मण्येव विश्राम्येन्न तु कर्तरीति न्यायात्, नापि मोक्षप्रसङ्गश्च,

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव का तत्र परिवेदना॥

इति भगवदुक्तेः, भोगापवर्गलक्षणपूर्वापरकोट्योर्विश्वस्य चिदानन्दैकरसत्वेन स्वस्वरूपतया प्रतिबन्धकत्वाभावात्, इच्छादिभूमिप्रविष्टघटादिवदर्थक्रिया-शून्यत्वात्, मध्यकोटावेव प्रतिबन्धकम्, अर्थक्रियाविशिष्टत्वात्,

मातृमेयमितिसाधनात्मिका त्वत्कृतोन्मिषति या विकल्पधीः।
तत्स्वरूपमकलङ्कितं तया तस्य देवि विदुषो न मुक्तता॥

इति चिद्गगनचन्द्रिकायां कालिदासोक्तेश्च ईश्वरेच्छाया एव नियामक-त्वान्मुक्तस्य न पुनर्बन्धप्रसक्तिरिति न काचिदनुपपत्तिरिति शक्तिपातपवि-त्रितहृदयैर्विद्वद्भिर्विमर्शनीयम्।

एवं स्थिते ब्रह्ममीमांसायां भगवता बादरायणेन प्रथमसूत्रे—"सदेव सोम्येदमग्र आसीत्", "एकमेवाद्वितीयं ब्रह्म", "तदैक्षत बहु स्यां प्रजायेय" इति श्रुतेः, "ईक्ष दर्शनाङ्कनयोः" इति धातुगत्या ईक्षणलक्षणदर्शनस्वभावत्वेन जडविलक्षणतया बृहत्वात्, बहु स्यामिति बहुभवनक्रियामर्शनरूपत्वेन दर्शन-स्वभावजीवविलक्षणान्यनिरपेक्षणकर्तृतालक्षणानन्दपरिबृंहितत्वाच्च ज्ञान-क्रियास्वतन्त्रं ब्रह्म जिज्ञास्यत्वेनोद्दिष्टमिति समनन्तरसूत्रोक्ततदसाधारणजग-ज्जन्मादिलक्षणमप्युपपद्यते। तथाहि—"अथातो ब्रह्मजिज्ञासा" इत्यत्र—"आत्मा

वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति विषयवाक्यम्। शास्त्रमनारम्भणीयमारम्भणीयं वेति संदेहः। "अतोऽस्मिन् लोके वेदे च प्रथितः पुरुषोत्तमः" इति भगवतैव गीतत्वाद् अत्र लोकप्रसिद्धिर्नानुमानेन, पामरादीनां व्याप्त्यादिज्ञानशून्यत्वात्, किन्त्वहमित्याबालविदितत्वेन। वेदेऽपि—"अहं ब्रह्मास्मि", "सत्यं ज्ञानमनन्तं ब्रह्म", "अहमस्मि प्रथमजा ऋतस्य", "पूर्वं देवेभ्यो अमृतस्य नाभिः" इत्यादिश्रुतेर्महेश्वरस्य प्रसिद्धत्वादसंदिग्धतया विचारविषयाभावात्, जीवाश्रिताविद्याया अपि ब्रह्मैकरूपत्वेन निवृत्त्यसंभवात्, ब्रह्मबाह्यपदार्थान्तराभावात्, जन्यानन्दावाप्तेरनित्यत्वेन हेयत्वात्, नित्यानन्दस्यानवाप्तव्यत्वात्, नित्यप्राप्तत्वात्। तस्मात् प्रयोजनाभावाच्च शास्त्रमनारम्भणीयमिति पूर्वः पक्षः।

सत्यं ब्रह्म तावदुभयत्राप्यहमिति प्रसिद्धमेव, तथापीह लोकेऽवैदिकेषु विवेकिनो विज्ञानवादिनो हि क्षणिकज्ञानसन्तानापेक्षया नित्यः कश्चिद् बुद्धिमान् तद्बुद्धिप्रेरकः कश्चिदीश्वरश्च नास्त्येवेति वदन्ति, तयोर्बुद्धिभिन्नत्वे सति बुद्धिबाह्यतया तत्सत्त्वे मानाभावात्। यदि मानमस्ति, तस्य बुद्ध्यन्तर्गतत्वेन घटादिभाववद् बुद्धितुल्यताया अनिवार्यत्वादिति। एवं वैदिकेष्वपि कापिलास्तु "अजाम्" इत्यादिश्रुतेः प्रधानस्य विश्वकारणत्वश्रवणात् पुरुषप्रधानातिरेकेण कश्चिदीश्वरो नास्तीति वदन्ति। जैमिनीयास्तु सुखलक्षणस्वर्गं प्रति ज्योतिष्टोमादिकर्मैव विधीयते, तज्जन्ययजमाननिष्ठापूर्ववशादेव तत्साधनीभूतपदार्थोत्पत्तिसंभवाद् वेदान्ताः कर्तृदेवताद्रव्यपरा अनुष्ठानोपयोगित्वेन सार्थक्यात् कर्मशेषा एव, न ब्रह्मपरा इति वदन्ति। तस्मादेव विविधवादिभिर्वेदेऽपि विप्रतिपन्नत्वाद् एवंविधवैदिकावैदिकप्रविष्टपाषण्डमतनिराकरणद्वारा वक्ष्यमाणशक्तिविकासलक्षणमोक्षावाप्तये शास्त्रमारम्भणीयमिति सिद्धान्तः।

एवं चास्य सूत्रस्यायमर्थः—अथ अनेकजन्मार्जितशिवपूजादिसत्कर्ममहिम्ना संप्राप्तशमदमादिसाधनसंपन्नस्याधिकारिणो मोक्षविषयकात्युत्कटेच्छाशक्त्याविर्भावानन्तरम्, अतः अथातो धर्मजिज्ञासेत्यादिस्वव्यतिरिक्तदेवतोपासनालक्षणयागयोगादिकर्मणाम् "एष कर्मचितो लोकः क्षीयते" इत्यादिश्रुतेरनित्यत्वेन हेयत्वात् कर्मणो जडत्वेनापूर्वोत्पादनोद्यमशून्यत्वात्, देवतायाश्च शब्दमयत्वेन जडत्वात्, तत एव फलसाधनयोर्गगनकुसुमायमानत्वात्, अनेनैव न्यायेन प्रधानकारणतावादिकापिलमतस्यापि प्रत्याख्यात-

त्वात्, वेदान्तानां भिन्नप्रकरणपठितत्वेन तात्पर्यनिश्चयहेतुकलिङ्गषट्के ब्रह्मपरत्वात्, एतदङ्गीकृतात्मतत्त्वस्य नानात्वेन परस्परव्यावृत्तरूपत्वा अत एव स्वविषयस्वरूपमात्रनिष्ठत्वात्, परविषयपरस्वरूपेष्वन्धबधिरप्रा त्वात्, चैत्रो मैत्राद्भिन्नः, चैत्रः सुखी, मैत्रो दुःखीति परस्परभेदानुसंधान भेदितानां चैत्रादिप्रकाशानां चैत्रमहं जानामीत्येकसंविल्लग्नत्वेनान्तर सन्धानस्याप्यसंभवात्, चैत्रोऽहमिति प्रकाशस्य स्वात्मविषयमात्रप्रका त्वात्, एवमवैदिकाङ्गीकृतक्षणिकविज्ञानात्मनोऽपि नीलादिरूपेण नानात्वा तज्जन्यसंस्काराणामपि तथात्वात्, भिन्नकालनिष्ठत्वेन परस्परसंगतिशू त्वात्, अत एवोक्तरीत्या स्वविषयमात्रनिष्ठत्वात्, परविषयपरस्वरूपेष्व बधिरप्रायत्वात्, नीलं पीताद्भिन्नं पीतं नीलाद्भिन्नं नीलमहं जानामि यो बाल्ये पितरावन्वभूवं स एवाहमिदानीं प्रनष्टावनुभवामीत्यहमित्येकसंवि ग्नत्वेन बाह्याभ्यन्तरानुसन्धानानुपपत्तेः, उभयक्षणग्राहकसंविदन्तराभावा सुप्त्यादौ हानादानलक्षणप्राणवायुपरिस्पन्दस्य विद्यमानत्वेन तस्य कर्तृपु स्सरत्वात्, कर्तृज्ञानपुरःसरत्वात्, सुखमहमस्वाप्समित्युत्थितस्य सुखस्मृ संस्कारद्वारानुभवानुभवितृमूलत्वात्, अनुभवितुः स्वतन्त्रस्वप्रकाशत्वात्, किञ्चिदवेदिषमिति शून्यप्रकाशस्यापि विद्यमानत्वात्, विशेषणविमुक्त हमात्मनः स्वप्रकाशतांशस्याप्राकट्येन स्थितेरङ्गीकरणीयतया लोके चिदा क्रियाणां दर्शितदिशा परप्रमातृविश्रान्तिमन्तरेणासंभवाच्च प्रोक्तन्याये स्वात्मतादात्म्यापन्नस्वविमर्शक्रोडीकृतानेकभावाभावमण्डलो ज्ञानस्मृत्यपो नादिवहुविधशक्तीनामेकसंघट्टः अनुभवितृस्मर्तृविकल्पयितृप्रत्यभिज्ञातृ शुद्धानुभवानुसन्धानात्मपूर्णाहंस्फुरणस्वरूपस्वतन्त्रस्वप्रकाशमहेश्वरोऽङ्गीक णीय इति हेतोस्तादृङ्महेश्वरेच्छाशक्तिनियमितत्वेन पुरुषतत्त्वनिष्ठाविद्यात स्य स्वकारणीभूतसर्वज्ञताशक्तिमामरस्यस्थितिरूपनिवृत्तिद्वारा स्वात्मशिवत लक्षणं फलमुद्दिश्य ब्रह्म स्वतन्त्रस्वप्रकाशतालक्षणाखण्डामर्शपरिबृंहित तस्य जिज्ञासा। अनेन पदेन विचारो लक्ष्यते। कर्तव्य इति शिष्यते। स्वात्म भेदेन परामर्शः कर्तव्य इत्यर्थः, पराभिमतभेदस्य निराकृतत्वात्।

अस्मिन् सूत्रेऽतःशब्देन वक्ष्यमाणसमन्वयाविरोधफलाध्यायार्थः सर्वोऽ संक्षिप्तः। अथशब्देन साधनाध्यायार्थः संगृहीतः। ब्रह्मशब्देन जडजीव विलक्षणस्वप्रकाशस्वतन्त्रताशक्तिस्वभावत्वं तात्पर्यविषयीकृतमिति सूक्ष्म दृशाऽनुसन्धेयम्। एवमेतत्सूत्रार्थपरामर्शनमात्रेणात्युत्तमाधिकारी कृतकृत्य भवतीति नूनम्।

एवमुद्दिष्टस्य ब्रह्मणः किंलक्षणम्, तेन विना वस्तुस्वरूपावधारणासंभवादित्याशङ्क्याह—जन्माद्यस्य यतः। अस्य इदमित्यङ्गुलिनिर्देश्यत्वेन प्रतीयमानस्य घटचैत्राद्युपलक्षितचराचरप्रपञ्चस्य जन्मादि, जन्म उत्पत्तिः, आदिशब्दात् स्थितिसंहारबन्धमोक्षा लक्ष्यन्ते, ते यतो यस्माद् भवन्ति तद् ब्रह्मेति शेषः। एवं च सृष्टिस्थितिसंहारतिरोधानानुग्रहाख्यपञ्चकृत्यकरणमहापाण्डित्यं ब्रह्मणोऽसाधारणं लक्षणमिति तात्पर्यम्। अत्र—"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्म" इति, "सत्यं ज्ञानमनन्तं ब्रह्म" इति द्वयं विषयवाक्यम्। यत्प्रयन्ति म्रियमाणानीत्यर्थः, अभिसंविशन्ति तद्ब्रह्मणि प्रविश्य तादात्म्यं भजन्त इत्यर्थः। इदं लक्षणं न युज्यते युज्यते वेति संदेहः। जन्मादेर्विश्वनिष्ठत्वेन ब्रह्मसंबन्धाभावात् सच्चिदानन्दानां लोके भिन्नार्थकत्वेनानुभूयमानत्वाद् धातुभेदाच्च अखण्डब्रह्मस्वभावत्वासंभवादेतल्लक्षणद्वयमपि न युज्यत इति पूर्वः पक्षः।

अत्रोच्यते—घटादेः स्वत एवोत्पत्तिविनाशासंभवात् कालकरणसापेक्षतया अनुभूयमानत्वात्, करणादीनां कर्मेन्द्रियादिद्वारा परिमितप्रमातृसापेक्षत्वात्, तस्य देशकालाद्यधीनत्वेन स्वतन्त्रेण विना न संभवतीति ब्रह्मनिरूपितत्वेनैव जगन्निष्ठत्वात्, अत एव ब्रह्मसंबन्धसद्भावात्, लोके सच्चिदानन्दानां भिन्नार्थकत्वेऽपि तेषां ब्रह्मण्येकरूपत्वात्। न चैकेनैव पदेन निर्वाहात् किमिति त्रिधा निर्देशः कृतः, लक्षणवाक्ये पर्यायपदप्रयोगस्य वैय्यर्थ्यादिति वाच्यम्, खपुष्पाद्यसत्पदार्थवैलक्षण्यद्योतनाय सत्पदम्, जडस्यापि सद्रूपत्वेन तत्रातिव्याप्तिनिवारणाय चित्पदम्, जीवस्य सच्चिद्रूपत्वेन तत्रातिव्याप्तिनिवारणायानन्दपदं पठितमिति विमर्शनीयत्वात्, चिदसीत्यङ्गीकरणीयत्वेन सच्चिदोरेकरूपत्वात्, चिदेव नन्दतीत्यानन्दस्यापि तदेकरूपत्वाल्लक्षणद्वयमप्युपपन्नमेवेति राद्धान्तः।

अत्र जन्मादिलक्षणे सृष्टिकर्तृत्वं चतुर्मुखसाधारणम्, सृष्टिस्थितिकर्तृत्वं विष्णुसाधारणं चतुर्मुखजनकत्वात्, सृष्टिस्थितिसंहारकर्तृत्वं रुद्रसाधारणं तस्य तदुभयजनकत्वात्, "धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मे" इति श्रुतेः सृष्टिस्थितिसंहारतिरोधानकर्तृत्वमीश्वरसाधारणम्, त्रिमूर्तीनां तन्नियम्यत्वात्, सृष्टिस्थितिसंहारतिरोधानानुग्रहकर्तृत्वं सदाशिवसाधारणम्, "ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः" इति श्रुतत्वेन चतुर्णामपि तन्नियम्यत्वात्। अतः पञ्च-

कृत्यकरणमहापाण्डित्यं लक्षणमित्युक्तम्, "आत्मा वा आकाशः" इत्यादिश्रु ब्रह्मणः सकाशादाकाशस्य तदभिमानिपुरुषस्य चोत्पत्तेः, आकाशाभिमानि सदाशिवस्यापि सृज्यकोटिनिविष्टत्वेन परशिवनियम्यत्वात्, पञ्चकृत्यकर महापाण्डित्यावभासात् तथा विशेषितम्, जडस्य जीवस्य च विश्वकर्तृ संभवात् सूत्रानुक्तमपि सच्चिदानन्दाख्यस्वरूपलक्षणं तात्पर्यविषयीकृतम्।

अथवा जन्म आद्यस्य यत इति विच्छेदः। एवं स्थिते "सत्यं ज्ञा मनन्तं ब्रह्म", "नारायणपरं ब्रह्म", "ऋतं सत्यं परं ब्रह्म पुरुषं कृ पिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षम्" इति श्रुतेर्बहूनां ब्रह्मणां प्राप्तत्वात्, जि स्यत्वेनोद्दिष्टं ब्रह्म किं रूपमित्याकाङ्क्षायाम्, आद्यस्य ब्रह्मादिस्थावरा प्रपञ्चोत्पत्तेः पूर्वमुत्पन्नस्य नारायणस्य जन्म उत्पत्तिर्यतो यस्माद् भव तद् ब्रह्मेति शेषः।

अत्र "एको ह वै नारायण आसीत्" इत्येतद्विषयवाक्यम्। लक्षणमि मनुपपन्नमुपपन्नं वेति संदेहः। महोपनिषदि सर्गाद्यसमये एतद्वाक्यानन्तरम्- "न ब्रह्मा नेशानः" इति श्रुतत्वेन तयोर्निषेधश्रवणात्। अथ तस्मादेव तयो रुत्पत्तिश्रवणाद् एतद्व्यतिरेकेण तज्जनकस्य कस्यचिदश्रवणात् "सदे सोम्येदमग्र आसीत्" इत्यादिब्रह्मप्रतिपादकवाक्यावत् सृष्टेः प्राग् नाराय स्यैकस्यैव स्थितिश्रवणात्। अतः सर्वत्र वेदान्तेषु सद् ब्रह्मादिरूपे सामान्यतः श्रूयमाणं विश्वकारणं वस्तु नारायण एवेत्यवगम्यते, "यदग्नीषो मीयं पशुमालभेत" इत्यत्र गवादिसन्देहे "छागो वा मन्त्रवर्णात्" इति पूर्व तन्त्रप्रसिद्धछागपशुन्यायात्, अत्रैवाग्रे "पत्युरसामञ्जस्यात्" इत्यधिकर सूत्रकृतैव शिवस्य विश्वकारणत्वं न संभवतीति निराक्रियमाणत्वात्। नारा यणस्य कारणं ब्रह्मेत्येतल्लक्षणं ह्यनुपपन्नम्, प्रत्युत रुद्रादिप्रपञ्चोत्पत्तेः पूर्व मुत्पन्नत्वेन ब्रह्मण एवाद्यत्वात्, "नारायणाद् ब्रह्मा जायते", "नारायणा रुद्रो जायते" इति श्रुत्यन्तरपठितत्वाच्च। तस्मादाद्यस्य ब्रह्मणो जन्म यत भवति तद् ब्रह्मेत्येतल्लक्षणं नारायणस्यैवोपपद्यत इति प्राप्ते ब्रूमः। अथर्व शिखायाम्—"किं तद् ध्यानं को वा ध्याता कश्चिद् ध्येयः" इत्युपक्रमप्राप्त प्रश्नानुरोधेन—"ध्यानं विष्णुः, ध्याता रुद्रः, ध्यायीतेशानः प्रध्यायितव्यः इति श्रुतत्वेन महोपनिषत्प्रसिद्धनारायणतत्रनिषेधकोटिप्रविष्टरुद्रयोः तरतम भावेन ध्यानध्यातृरूपत्वमुक्त्वाऽनन्तरमीशानस्य ध्येयत्वेन विहि तत्वान्नारायणापेक्षया कश्चिन्महेश ... ...

नन्वीशानस्य निषेधश्रवणात् कथं तस्य ध्येयत्वं संभवतीति शङ्कां निराकर्तुं समनन्तरम्—"सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैर्न कारणं कारणं तु ध्येयः" इति श्रूयते। अत्र तत्पदस्वारस्यान्महोपनिषत्पठितब्रह्मविष्णुरुद्राणाम् "इदि परमैश्वर्ये" इति धातोरिन्द्रपदोपलक्षितान्यत्रप्रसिद्धतत्पुरुषेशानापरपर्यायेश्वरसदाशिवयोश्च जडीभूतभूतेन्द्रियादिभिः सह संप्रसूतिप्रवचनेन तत्तुल्यपारतन्त्रीत्युत्पत्त्यवगमान्न कारणमित्यनेनैतत्कारणीभूतेशानो न संप्रसूयत इति सूचितम्। कारणं तु ध्येय इत्यत्र तुशब्दस्वारस्यात् कार्यकोटिप्रविष्टेशानस्य निषेधश्रवणात् कारणीभूत ईशानो ध्येय इति सूचितम्। अत्र कारणं तु ध्येय इत्युक्तत्वेन तत्कारणमन्यदेव स्यादिति शङ्कां निराकर्तुम्। कारणानामुक्तलक्षणसृष्ट्यादिकृत्येषु नियमितानां ब्रह्मादिपञ्चब्रह्मणां धाता रक्षक इत्यर्थः। ध्याता स्वात्मारामः, आदिसंकल्पकर्तेति वा, सर्वैश्वर्यसंपन्नः सर्वेश्वरश्च। अत्र चकारस्वारस्यात् सर्वेश्वरशब्दवाच्य इत्यर्थः। शम्भुराकाशमध्ये शिव एको ध्येयः शिवंकरः, मोक्षप्रद इत्यर्थः। ध्यानफलं चोक्तम्, सर्वमन्यत् परित्यज्य जननमरणपरिपीडितं देवतान्तरं परित्यज्येत्यर्थः। समाप्ताऽथर्वशिखा। इतोऽतिरिक्तत्वेन वक्तव्यांशो नास्तीत्यभिप्रायेण स्वसमाप्तिं स्वयमेवाह। इति स्फुटतरं श्रूयमाणत्वान्महोपनिषत्प्रसिद्धब्रह्मादिविश्वकारिणीभूतनारायणस्यापि कारणीभूतः शिव एको ध्येय इत्यवगमात्, "एको ह वै नारायण आसीत्" इत्यत्र आसीत्पदस्य "रोहितो लोहितादासीत् शक्तेरासीत् पराशरः" इतिवदुत्पत्तिसत्तापरतावश्यंभावेन लक्षणमुपपन्नमेव।

नन्वत्र नारायणस्योत्पत्तिर्ध्यातृरुद्रापेक्षया वरत्वं च न श्रूयते, किन्तु विष्णोरेव, नारायणस्यानन्तावतारसद्भावाद् विष्णोस्तदवतारमूर्तित्वात्, अथवा "आदित्यानामहं विष्णुः" इति गीतितत्वेन तदंशीभूतत्वात् तत्परतोपपत्तेरत्रत्येशानादिशब्दानां लक्षणया नारायणपरत्वमेव युक्तमिति चेन्न, मुख्यब्रह्मरुद्रमध्यपठितविष्णुशब्दस्यावतारांशपरत्वासंभवात्, "यत्प्रायः श्रूयते तच्च तत्तादृगवगम्यते" इति पूर्वतन्त्रवार्त्तिकन्यायात्, अन्यथापि किंकारणं ब्रह्मेति संदिह्यमानानां ब्रह्मवादिनां स्वतो निर्णेतुमशक्यत्वाद् देवीं ध्यायतां तत्प्रसादेन जगत्कारणीभूतं ब्रह्म शिव एवेति निर्णीयते, श्वेताश्वतरे—"यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः। अजात इत्येव कश्चि-

द्भीरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम् ॥", "यदा च
वदाकाशं वेष्टयिष्यन्ति मानवाः। तदा शिवमविज्ञाय दुःखशान्तिर्भविष्यति
इति श्रुतत्वेन सृष्टेः पूर्वं विश्वोपादानकारणीभूतप्रकृत्यपरपर्यायाज्ञानलक्ष
तमोमात्रावशिष्टकाले दिवारात्रिलक्षणसदसद्विभागशून्यत्वं प्रतिपाद्य स
शिवस्यैव स्थितिश्रवणेन द्वितीयस्यावस्थानासंभवात्, तस्याजातत्वश्रवणा
जननमरणपरिपीडितमुमुक्षुजनप्रार्थनीयत्वश्रवणात्, शिवज्ञानस्यैव मो
प्रदत्वश्रवणाच्च। तस्योत्पत्तिविनाशासंभवात्, "सहस्राणि सहस्रशो ये
अधिभूम्याम्" इत्यादिश्रुतेस्तदवताररूपानन्तरुद्रमूर्तिसद्भावात् तत्रो
त्पत्तिविनाशावपि दिक्पालान्तर्गतेशानपरावेव स्याताम्।

तथा च सृष्टेः प्राग् द्वयोरप्यवस्थानासंभवात्, "विष्णुरित्था परमः
विद्वान् जातो ब्रह्मन्नभिपाति तृतीयम्" इति श्रुत्यन्तरे बृहदिति विशेषणसा
र्थ्याद् महाविष्णोरेवोत्पत्तिमत्त्वं परमात्मवेतृत्वमशुद्धमिश्रविलक्षणशुद्धब्र
रूपपरशिवराजधानीपरिपालकत्वं च प्रतीयत इति तत्रत्यासीत्पदस्य दर्शि
दिशा उत्पत्तिसत्तापरतावश्यंभावेन शिवशम्भ्वाद्यनेकशब्दलक्षणकल्पना
अप्रामाणिकत्वात्, कैवल्यश्रुतौ—"उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नी
कण्ठं प्रशान्तम्। ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः प
स्तात् ॥ स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्। स एव वि
स प्राणः स कालोऽग्निः स चन्द्रमाः ॥ यद् भूतं यच्च भव्यम्" इत्यु
"ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये" इति श्रुतत्वेनेतरनिषेधपु
सरं मुमुक्षूपास्यस्य परमेश्वरस्योमासहायत्वत्रिलोचनत्वनीलकण्ठत्वश्रवणा
एषां शिवैकांशिकत्वेन कथञ्चिदपि नारायणपरत्वासंभवाच्च।

एवं स्थिते "पत्युरसामञ्जस्यात्" इत्यधिकरणे तान्त्रिकपाशुपताङ्गीकृ
केवलविश्वनिमित्तकारणतया निराकृतत्वात्, अत एव "शब्दादेव प्रमित
इत्यधिकरणे—"अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानो भू
भव्यस्य स एवाद्यः स उ श्वः ॥" इति कठवल्लीमन्त्रस्य परिच्छिन्नपरिमाण
लिङ्गेन जीवपरत्वमाशङ्क्य भूतभव्यस्येत्युपपदे सत्यप्येवकारेण भूतभ
पदार्थेशितृत्वलिङ्गं परित्यज्य शब्दादितीशानशब्दाद् ब्रह्मपरताया अङ्ग
कृतत्वात्।

किञ्च, अत्र "चराचरग्रहणात्" इत्यधिकरणे कठवल्लीद्वितीयवल्
"यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्था

यत्र सः ॥" इति श्रुतस्य मन्त्रस्य जीवाग्निपरत्वमाशङ्क्य द्वयोरपि तयोर्मृत्यु-ग्रस्तत्वाद् मृत्युर्यस्योपसेचनमित्युक्तत्वेन चराचरप्रपञ्चसंहारकर्तृत्वावगमाद् मन्त्रोऽयमीश्वरपर इति निर्णीतत्वेन जगत्संहारकत्वमीश्वरलक्षणमित्यङ्गी-कृतत्वात्, संहारकर्ता शिव इति प्रसिद्धत्वात् । एवं च पत्युः पशुपतेः पाशु-पताङ्गीकृतकेवलविश्वनिमित्तकारणत्वं न संभवति, असामञ्जस्यात्, स्वव्यति-रिक्तमृदाद्युपादानकारणान्तरसापेक्षकुलालादिवत् स्वात्मौन्मुख्यविगलनेनान्य-त्रौन्मुख्याद् अदृष्टादिपरतन्त्रतापत्त्या अनीश्वरत्वप्रसङ्गादिति न कोऽपि विरोधः ।

"विश्वाधिको रुद्रो महर्षिः" इति श्रुतेर्विश्वाधिकत्वश्रवणात्, एकैकमन्त्र-द्रष्टृऋष्यपेक्षया सकलमन्त्रद्रष्टृत्वेन महर्षित्वाद् अत एव ब्राह्मणोत्तमत्वाद् ब्राह्मणैरुपासनीयः, पादोदकप्रसादावपि स्वीकरणीयौ, भृग्वादिशापस्य विश्वा-न्तर्गतगुणिरुद्रतीर्थप्रसादविषयत्वात्, भृग्वादेस्तावत्पर्यन्तभावनासंभवात्, मुक्तस्थानत्वात्, "न स पुनरावर्तते" इति श्रुतेः । अलं प्रासङ्गिकेन । "विश्वं नारायणं हरिम्" इति श्रुतेः, "विश्वं विष्णुर्वषट्कारः" इति तन्नामसहस्र-स्मृतेश्च विष्णोर्विश्वान्तर्गतत्वात्, पतिं विश्वस्येति विश्वपतित्वश्रुतेस्तस्य स्व-कार्यरूपविश्वापेक्षयेति न विरोधः, नारायणपरं ब्रह्मेत्यत्र नारायणात्परं ब्रह्मे-त्युपपन्नत्वात् । अन्यत्र नारायणः परं ब्रह्मेति पाठे "सुपां सुलुग्" इति सूत्रेण पञ्चम्याः स्वादेशस्य कल्पनीयत्वात् सर्वं समञ्जसम् । एवं स्थिते भाविप्रपञ्च-कारणीभूतनारायणाविर्भावभित्तिभूतं परशिवाख्यं वस्तु जगदुदयादिबीज ब्रह्मेति राद्धान्तः ।

ननु एतावताऽर्थप्रपञ्चकारणं ब्रह्मेत्युक्तं भवति, शब्दप्रपञ्चकारत्वेनोक्तं तत्किं ब्रह्मवन्नित्यं वेत्याशङ्क्याह—शास्त्रयोनित्वात् । "अस्य महतो भूतस्य निःश्वसितमेतद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः" इति विषय-वाक्यम् । अत्र ब्रह्म वेदं न करोति करोतीति संदेहः । न करोति, वेदस्य नित्यत्वात्, "वाचा विरूपनित्यया" इति श्रुप्रमाणत्वात्, विषयवाक्येऽपि वेदस्य ब्रह्मणोऽप्रयत्नसिद्धनिःश्वसितरूपतावगमात्, "अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी विद्या यतः सर्वाः प्रवृत्तयः ॥" इति स्मृतेश्चेति पूर्वः पक्षः ।

अत्राभिधीयते—ब्रह्म वेदस्य कर्तृ भवितुमर्हति, निःश्वसितन्यायेनाप्रयत्नो-त्पत्त्यवगमात्, "तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे" इति सर्वयज्ञ-

हूयमानाद् यज्ञशब्दवाच्यान्महेश्वरादतिस्पष्टमेव वेदोत्पत्तिश्रवणाच्च निः सितन्यायेनाप्रयत्नोत्पत्त्यैव अर्थं बुध्वा विरचितैः कालिदासप्रभृतिवाक् वैलक्षण्यादपौरुषेयत्वम्, प्रतिसर्गं पूर्वसाम्येनोत्पत्तेः प्रवाहरूपेण नित्यत्वासं वादिति राद्धान्तः। अत्र सर्वविश्वव्यवस्थाप्रकाशकवेदकर्तृत्वनिरूपणेन ब्रह्मण सर्वज्ञत्वमुक्तं भवति। पूर्वसूत्रे सर्वकर्तृत्वं निरूपितमिति मन्तव्यम्।

अथवा नन्वेवंविधलक्षणोपलक्षिते ब्रह्मणि किं प्रमाणमित्याकाङ्क्षाय माह—शास्त्रयोनित्वात्। अत्र "त[1] चौपनिषदं पुरुषं सृजामि" इति विष वाक्यम्। अत्र ब्रह्मणः प्रत्यक्षादिप्रमाणगम्यत्वमस्ति वा न वेति संदेहः घटादिवत्सिद्धवस्तुत्वान्मानान्तरगम्यत्वमस्तीति पूर्वः पक्षः। रूपरसाद्यभाव न्नेन्द्रिययोग्यता। नाप्यन्तःकरणगोचरत्वम्, सुखदुःखादिवज्जडत्वप्रसङ्गात् न च सुखादेरन्तःकरणावच्छिन्नचैतन्यवेद्यत्वाज्जडत्वं युक्तम्, आत्मनस्त्वन्तः करणमात्रगोचरत्वान्न जडत्वमिति वाच्यम्, अन्तःकरणस्य जडत्वेन वेदकत् न संभवतीत्यभिप्रायेणैव किल घटसुखादेरन्तःकरणवृत्त्यवच्छिन्नचैतन्यवेद्यत्व मङ्गीकृतम्। एवं प्रकृतेऽप्यन्तःकरणस्य जडत्वेन वेदकत्वासंभवात् तद्वृत्त्य वच्छिन्नचैतन्यवेद्यताया अङ्गीकरणीयत्वेन जडतापत्तेरनिवार्यत्वात्। नाप्यनु मानम्, तस्य प्रत्यक्षमूलत्वेनातिपरिच्छिन्नमहेश्वरप्रकाशनापाटवत्वात् अन्यथा तस्य तदन्तर्गततया भासमानत्वेन परिच्छिन्नत्वप्रसङ्गात्, तदन्त र्गतत्वे सति तत्प्रकाश्यत्वासंभवात् तद्ग्राह्यत्वात्।

न च शब्दलिङ्गेनाकाशानुमानवत् संभवतीति वाच्यम्, आकाशस्यापि जन्यत्वेन परिच्छिन्नत्वात्, तस्य तत्कर्मत्वेन तदेकरूपत्वात्। अन्यथा जला दिवत् तत्तद्धर्मत्वप्रसङ्गात्, अनुमितेर्विशिष्टनिष्ठत्वेन ब्रह्मस्वभावत्वासंभवात् एवं शाब्दज्ञानविषयत्वपि न संभवति, परिच्छिन्नत्वात्, स्वातिरिक्तसंविदन्तर वेद्यत्वेन घटादिवज्जडत्वप्रसङ्गात्, "विज्ञातारमरे केन विजानीयात्" इति श्रुतेश्चेति चेत्, इत्थमालोचनीयम्—वेदस्य त्वप्रयत्नसिद्धमाहेश्वरीयनिश्व सितरूपतावगमेन "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्रुतेर्ब्रह्माणं प्रति वेदानां शब्दजालमुपदेष्टुर्महेश्वरस्योक्तेर्विवक्षाधीनत्वात् इच्छायाः सविषयत्वात्, "चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मण ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥" इति श्रुतेरङ्कुरायमाणाङ्कुरितपल्लवितफलितलक्षणसूक्ष्मापश्यन्ती

१. "तं त्वौपनिषदं पुरुषं पृच्छामि" (३।९।२६) इतिबृहदारण्यकश्रुतिपाठः।

मध्यमावैखर्यन्तरपर्यायारम्भविवक्षाध्यवसायोक्तिरूपेण स्वविमर्शरूपतावगमात्। अतः स्वानतिरिक्तत्वादनधिगतयत्किञ्चित्तन्माहात्म्यप्रकाशनक्षमत्वाद् वेदैकप्रमाणगम्यमहदैश्वर्यं ब्रह्मेति राद्धान्तः। एवं च शास्त्रस्य वेदागमादिशब्दप्रमाणस्य योनित्वात् तन्माहात्म्यप्रकाशनक्षमत्वादिति सूत्रार्थः।

ननु वेदान्तानां ब्रह्मपरत्वं न संभवति, अनुष्ठानोपयोगित्वेन निष्प्रयोजनत्वात्, कर्तृदेवतासाधनपरत्वेऽनुष्ठानोपयोगित्वेन सार्थक्यात्, कर्मशेष एव शब्दार्थलक्षणप्रपञ्चस्य चिद्विजातीयत्वेन ब्रह्मोपादानकत्वासंभवादुक्तलक्षणं च न संभवतीत्याशङ्क्याह—तत्तु समन्वयात्। तत् तु समन्वयादिति तुशब्दः पूर्वपक्षनिरासार्थः। अत्र "सदेव सोम्येदमग्र आसीत्" इत्यारभ्य "स आत्मा तत्त्वमसि श्वेतकेतो" इत्यन्तं विषयवाक्यम्। वेदान्ताः कर्मपरा वा ब्रह्मपरा वेति संदेहः। यजमानस्य दुःखान्तरायाद्यसंभिन्नसुखलक्षणस्वर्गं प्रति "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादिवाक्यैः कर्मैव विधीयते, तज्जन्ययाजमाननिष्ठापूर्ववशादेव तत्साधनीभूतपदार्थोत्पत्तिर्देहान्तरकालान्तरभाविस्वर्गश्च संभवति। एवं च वेदान्तेषु जीवप्रतिपादकवाक्यानि कर्तृयजमानपराणि, ब्रह्मप्रतिपादकवाक्यानि देवतापराणि, सृष्टिप्रतिपादकवाक्यानि द्रव्यादिसाधनपराणि। एवमङ्गीकारे वेदान्तानामनुष्ठानोपयोगित्वेन सार्थक्यम्, ब्रह्मपरत्वे तदभावाद् वैयर्थ्यं स्यात्। अतः कर्तृदेवतासाधनपरत्वेन कर्मशेषा एव न ब्रह्मपरा इति प्राप्ते ब्रूमः।

वेदान्तानां भिन्नप्रकरणपठितत्वेन कर्मशेषत्वं न संभवति, "उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥" इति तात्पर्यनिश्चयहेतुकलिङ्गषट्केन ब्रह्मपरत्वात्। तथाहि—"सदेव सोम्येदमग्र आसीत्" इत्युपक्रम्य, "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि" इत्युपसंहारः। अनयोर्ब्रह्मविषयत्वेनैकं लिङ्गम्। असकृत् "तत्त्वमसि" इत्यभ्यासः। मानान्तरागम्यमहदैश्वर्यमपूर्वत्वम्। "येनाश्रुतं श्रुतं भवति अमतं मतमविज्ञातं विज्ञातम्" इत्याद्येकविज्ञाने सर्वविज्ञानं फलम्। यथा मृत्तिकायां ज्ञातायां घटशरावादिकं तत्कार्यत्वात् तदभिन्नमिति विज्ञातं भवति, तथैवेत्यर्थः। सृष्टिस्थितिलयप्रवेशनियमस्थानानि पञ्चार्थवादाः। मृदादिदृष्टान्ता उपपत्तयः। एतैर्लिङ्गैर्ब्रह्मपरत्वात्। न चानुष्ठानमन्तरेण प्रयोजनाभावः, देहाद्यहन्तानिमज्जनद्वारा पूर्णाहंभावोन्मज्जनरूपमहाफलस्य संभवात्।

नन्वेवं वेदान्तानां ब्रह्मपरत्वेऽपि ते ब्रह्मण्येव न पर्यवस्यन्ति, कि "सत्यं ज्ञानमनन्तं ब्रह्म" इति पारोक्ष्येण ब्रह्मतत्त्वं प्रनिपाद्य पश्चादपरो विदधति। एवं सति वेदान्तानां शासनात् शास्त्रत्वमुपपद्यते, अनधिगता गन्तृत्वात्। किन्तु श्रोतव्य इति शाब्दज्ञानात्मकं श्रवणं विधायानन्तरम् "मन्तव्यो निदिध्यासितव्यः" इत्यनुभवज्ञानात्मकं विधीयते। तस्माद्वेदान्त प्रतिपत्तिविधायका इति चेन्न, कर्तुमकर्तुमन्यथाकर्तुमशक्यत्वेनापुरुषार्थत्वा प्रतिपत्तिविधिर्न संभवत्येव। अनुष्ठेयशासनादेव शास्त्रत्वं नान्यथेति नियः नास्ति, सिद्धवस्तुसाधनेनापि तदुपपत्तेः। न च शाब्दज्ञानेन ज्ञाते पश्चाद् भवात्मकं मननादिकं विधीयत इति वक्तुं युक्तम्, दशमस्त्वमसीतिवत् शब्द स्यैवापरोक्षज्ञानजनकत्वेन शाब्दबोधात् पुरैव असंभावनादिनिवृत्तये क व्यापाररूपमननादेर्विधानात्, प्रमाणानां मोहापसारणमात्रप्रयोजनत्वा घटोऽयमग्रतः प्रत्यक्षत्वादित्यादौ तथानुभूयमानत्वात्। अत्र घटो न क्रिय सिद्धत्वात्, न ज्ञाप्यते प्रत्यक्षेणैव ज्ञाप्यमानत्वात्, किन्त्वग्रकत्वसाधनेनानग्र इति मोहोऽपनीयत इति। एवं धूमलिङ्गेन वह्निमत्त्वसाधनेन वह्न्यभाव मोहोऽपसार्यत इति वेदान्ता ब्रह्मण्येव पर्यवसिताः। अतः "ऐतदात्म्यमि सर्वं तत्सत्यम्" इति श्रुतत्वेन सन् घटः सन् पट इत्यादिरूपेण सर्व सामान्यादिषु सत्ता जडे विलक्षणस्वरूपसत्तानुवृत्तिदर्शनेन सत्कार्यत्वादु लक्षणस्यात्युपपत्तेः, जडस्य स्वतःसिद्धसत्तानुवृत्त्यसंभवात् स्वतन्त्रताप परतःसिद्धसत्तानुवृत्त्यसंभवप्रकारस्य दर्शितत्वात् सच्चिद्घनत्वमकामेनाप्यङ्ग करणीयमिति, कर्मणो जडत्वेनादृष्टोत्पादनोद्यमशून्यत्वात्, अदृष्टस्या जडत्वेन स्वर्गतत्साधनीभूतद्रव्योत्पादनोद्यमशून्यत्वात्, सर्वप्रपञ्चसत्ता स्वतन्त्रस्वप्रकाशब्रह्मैव सर्ववेदान्तप्रतिपाद्यमिति सिद्धान्तः। एवं स तात्पर्यनिश्चयहेतुकलिङ्गषट्केन वेदान्तानां ब्रह्मणि समन्वयात् तद् ब्रह्म उ लक्षणप्रमाणगम्यमहदैश्वर्यमिति भावः।

ननु "असङ्गो ह्ययं पुरुषः" इति श्रुतेर्ब्रह्मणो विश्वकारणत्वं न संभ त्येव, किन्तु वेदान्तेषु कारणवाक्यानि प्रधानपराण्येव, तथा श्रूयमाणत दित्याशङ्क्याह—ईक्षतेर्नाशब्दम्। ईक्षतेः न अशब्दम् इति विच्छेद छान्दोग्ये षष्ठाध्याये—"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म" इ प्रस्तुत्य "तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत" इति श्रूयते। विषयवाक्यम्। अत्र तच्छब्दवाच्यं विश्वकारणं प्रधानं वा ब्रह्म वेति संदेह अत्र सांख्या वदन्ति—तच्छब्दवाच्यं सर्वजगत्कारणं प्रधानमेव, "अजामे

लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्" इति श्रूयमाणत्वात् तस्य सत्त्वगुणयुक्तत्वात्, परिणमनक्रियास्वभावत्वाच्च ज्ञानक्रियाशक्त्योरपि संभवात्, ब्रह्मणो निर्विशेषत्वेन तदसंभवादिति प्राप्ते ब्रूमः—तदैक्षतेत्यत्र ईक्षितृत्वश्रवणात्, प्रधानस्य जडत्वेन तदसंभवात्, तच्छब्दवाच्यं चेतनं ब्रह्मैव, तस्य निःसङ्गत्वं निर्गुणत्वं च नैयायिकाङ्गीकृतस्वव्यतिरिक्तगुणसङ्गराहित्यात्, स्वरूपानतिरिक्तज्ञानक्रिययोरङ्गीकरणीयत्वात्, अन्यथा जडत्वप्रसङ्गात्। इष्टापत्तौ पुरुषस्य प्रकृतिप्रेरकत्वासंभवेन विश्वोत्पत्तिरेव न स्यात्, प्रकृतेर्जडत्वेन प्रेरकमन्तरेण कार्योत्पादनाक्षमत्वात्। न च "तेज आप ऐक्षन्त" इतिवद् गौणमीक्षणं प्रधानस्य संभवतीति वाच्यम्, "हन्ताऽहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति मध्ये त्वस्तिताद्यपरित्यक्तनामरूपव्याकर्त्री विश्वकारणदेवता स्ववाचकेनात्मशब्देन चेतनजीवं व्युपदिशतीत्युपसंहारे—"स आत्मा तत्त्वमसि श्वेतकेतो" इति शिष्यं प्रति जगत्कारणतादात्म्यं गुरुणोपदिश्यत इति गौणेक्षणस्याप्यसंभवात्।

नन्वत्र—"जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति श्रुतत्वाद् जीवस्य विश्वकारणतावगमात् कथं विश्वकारणत्वं ब्रह्मसाधारणलक्षणं भवितुमर्हतीति चेन्न, जीवशब्दस्य ज्ञानक्रियास्वभावचेतनपरत्वात्, "जानता कुर्वता भाव्यं जीवता परयोगिना। दृक्क्रियासदसद्भावौ हेतुरैश्वर्यजाड्ययोः॥" इति शिवदृष्टिस्मृतत्वाच्च ज्ञानक्रिये विना प्रपञ्चस्य व्याकर्तुमशक्यत्वात्। नन्वेवमपि ज्ञानक्रियास्वभावत्वं जीवसाधारणं भवतीति पुरुषतत्त्वमेव तच्छब्दवाच्यं किं न स्यादिति चेन्न, "आत्माप्यनीशः सुखदुःखहेतोः", "ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्त" इति श्रुतेर्ब्रह्मादीनामपि भूतेन्द्रियादिभिस्तौल्येन परतन्त्रोत्पत्तिश्रवणेन सुखदुःखादिदूषितत्वेन च विश्वकारणत्वासंभवात्, कार्यकोटिप्रविष्टत्वात्, तत्कारणीभूतमहेश्वरस्य सर्वैश्वर्यसंपन्नः सर्वेश्वरश्चेति सर्वैश्वर्यशालित्वसर्वेश्वरशब्दवाच्यत्वयोः श्रवणात्, प्रकृतिनिष्ठस्य पुरुषस्य स आत्मा तत्त्वमसीति मोक्षोपदेशाच्च नातिव्याप्तिः। गोमयादेर्वृश्चिकाद्युत्पत्तिदर्शनात्, ऊर्णनाभिदृष्टान्ताच्च ब्रह्मणः स्वतन्त्रत्वान्न स्वव्यतिरिक्तकारणान्तरसहायापेक्षा, अन्यथा क्रियाशक्तिविहीनत्वे सति ब्रह्मणः शुक्तिरजतादिवदलीकत्वमापतेदिति स्वतन्त्रस्वप्रकाशताशक्तिपरिबृंहितं ब्रह्मैव तच्छब्दवाच्यमिति राद्धान्तः।

एवं च अशब्दं वक्तृत्वशून्यं प्रधानं न विश्वकारणं भवितुमर्हति, ईक्षे ईक्षितृत्वश्रवणादिति सूत्रार्थः । अस्मिन्नधिकरणे वक्ष्यमाणाविरोधाध्याया सर्वोऽपि संगृहीतः, तन्निष्ठस्य मोक्षोपदेशादित्युत्सूत्रितत्वात् फलाध्यायार्थश्च समन्वयसूत्रे समन्वयाध्यायार्थः, जिज्ञासासूत्रे साधनाध्यायार्थः सर्वोऽ संगृहीत इत्युत्तमाधिकारिणं प्रति ईक्षत्यन्तैव ब्रह्मविद्या, मध्यमाधिका प्रति पञ्चपादिका, अधमाधिकारिणं प्रति अवशिष्टशास्त्रं प्रवृत्तमिति मन्तव्य अत्र प्रणवार्थसारभूतसकलसाधारणसद्रूपात्मत्वजडोत्कृष्टत्वजीवविलक्षण दैश्वर्यसंपन्नतारूपसच्चिदानन्दाख्यस्वरूपलक्षणमेव प्रकटीकृतमिति सूक्ष्मदृ विलोकनीयम् ।

अग्रे—"तदनन्यत्वमारम्भणशब्दादिभ्यः, आत्मकृतेः परिणामात्, कृत्स्न प्रसक्तिर्निरवयवत्वशब्दकोपो वा, आत्मनि चैवं विचित्राश्च हि, मायामात्रं कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्, नेतरोऽनुपपत्तेः" इत्यादिसूत्रैर्जडाज प्रपञ्चस्य कर्तृमहेश्वराभिन्नत्वमेव विशेषतः प्रकटीक्रियते । अत्र मायाशब्देन- "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति स्वाभाविकप्रकृ कथ्यते । सा च प्रकृष्टा कृतिरिति व्युत्पत्त्या अघटनघटनापटुतरा कर्तृस्वभा भूता क्रियाशक्तिः कथ्यते । तस्मादियमेव विद्या विद्या न भवतीत्यवि मिथ्याभूतेति न विरोधः, "तस्यावयवभूतेन व्याप्तमेतच्चराचरम्" इत्य श्रवणात्, एवंभूतमायिनो महेश्वरस्यावयवभूतेन अंशावताररूपेण नारायण जगत्सर्वं व्याप्तमित्यवगमात्, "श्रोत्रं च श्रोतव्यं च नारायणः" इत्यादिश्रुते सापेक्षतया भाविविश्वोपादानकारणं नारायण एवेति तस्य विमर्शशक्ति मवगन्तव्यम् ।

रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥

इति गीतत्वाच्च । एवं स्थिते ब्रह्मणस्तावद् दृक्क्रियास्वभावत्वेन चेतनत्वा "चैतन्यमात्मा" इति शिवेनापि सूत्रितत्वात्, ब्रह्मशिवसूत्रयोरेकार्थविश्रान्त त्वेन विरोधाभावात् शास्त्रैक्यं विमर्शनीयम् ।

अथ—"विशब्देनोच्यते विद्या शिवजीवैक्यबोधिका ॥ तस्यां रमन्ते शैवा वीरशैवाः प्रकीर्तिताः ॥" इति तत्सिद्धान्तवचनात् तेनापि विरोधा

भावात् तदैक्यं विमर्शनीयम्, तत्सिद्धान्तस्य लिङ्गाङ्गसामरस्यप्रतिपादकत्वात्। तथाहि तदागमेषु—"घनलिङ्गं महाभासं सच्चिदानन्दलक्षणम्। निष्कलं निष्क्रियं शान्तं स्वतन्त्रं स्वप्रकाशि तत्॥ सर्वेषां स्थानभूतत्वाल्लयभूतत्वतस्तथा। तत्त्वानां महदादीनां स्थलमित्यभिधीयते॥ स्थाणौ सर्वाश्रयेऽनन्ते सच्चिदानन्दरूपिणि। यस्मिन् ब्रह्मणि लीयेत प्रपञ्चस्तत्स्थलं स्मृतम्॥ स्वशक्तिक्षोभमात्रेण स्थलं तद् द्विविधं भवेत्। एकं लिङ्गस्थलं प्रोक्तमन्यदङ्गस्थलं स्मृतम्॥ लिङ्गस्थलं त्रिधा ज्ञेयं भावप्राणेष्टभेदतः। प्रथमं भावलिङ्गं स्याद् द्वितीयं प्राणलिङ्गकम्॥ तृतीयमिष्टलिङ्गं स्यादित्येवं त्रिविधं स्मृतम्। एकमेकं स्थलं भूयो द्विविधं द्विविधं भवेत्॥ महालिङ्गं प्रसादाख्यं भावलिङ्गविभागजम्। प्राणलिङ्गाज्जङ्गमाख्यं शिवलिङ्गं च भिद्यते॥ गुरुलिङ्गं तथाचारलिङ्गमिष्टविभागतः। अङ्गस्थलं तथा प्रोक्तमाचार्यैः सूक्ष्मदर्शिभिः॥ योगाङ्गं प्रथमं प्रोक्तं भोगाङ्गं च द्वितीयकम्। त्यागाङ्गं च तृतीयं स्यादित्येवं त्रिविधं स्मृतम्॥ योगाङ्गमैक्यं शरणं स्थलमित्युभयं भवेत्। प्राणलिङ्गि प्रसादीति द्वयं भोगाङ्गमिष्यते॥ माहेश्वरस्थलं भक्तस्थलमित्युभयं स्थलम्। त्यागाङ्गं भवतीत्येव प्रोच्यते तत्त्वदर्शिभिः॥" इति।

अयं भावः—सकलप्रपञ्चसृष्टिस्थितिलयभित्तिस्थानभूतं वस्तु स्थलशब्देनाभिधीयते। तद्वस्तूक्तलक्षणमूलप्रणवप्रकाशैकविग्रहं परशिवतत्त्वं मानान्तरनिरपेक्षभासमानत्वात् स्वप्रकाशम्, कारणान्तरनिरपेक्षकुर्वाणत्वात् स्वतन्त्रम्, अत एवान्यनिरपेक्षवर्तमानम्, अत एवाकर्मकाक्रमस्वसंवेदनलक्षणसच्चिदानन्दस्फुरणमयम्। एवंविधपरिपूर्णाहन्तात्मकपरमशिवस्य पूज्यपूजकलीलायां निस्तरङ्गसमुद्रे तरङ्गोत्पत्तेः प्राग् लहरीव स्वात्मनि ईषच्चलनमुत्पद्यते। तच्चलनेनान्योन्यसमरसीभूतस्वतन्त्रस्वप्रकाशतांशमात्रे तूत्तमकर्तृतामात्रवियोगान्न्यूनाधिकभावेन स द्विधा भिद्यते। तत्राधिकभावापन्नस्वप्रकाशतायां प्रतिस्फुरणगत्या प्रविष्टमूलप्रणवरूपशिवचैतन्यमेव लिङ्गतत्त्वं भवति। न्यूनीभूतस्वप्रकाशतायां तथैव प्रविष्टशिवचैतन्यमेवाङ्गतत्त्वं भवति।

तत्र लिङ्गतत्त्वं तु क्रमेण सच्चिदानन्दप्रतिफलनकलनात्मकभावलिङ्गमिति, प्राणलिङ्गमिति, इष्टलिङ्गमिति त्रिविधं भवति। पुनरिदं लिङ्गत्रयं प्रत्येकं द्विविधं भवति। तत्र भावलिङ्गं हि महालिङ्गं प्रसादलिङ्गमिति

द्विविधं भवति। प्राणलिङ्गं तु जङ्गमलिङ्गं शिवलिङ्गमिति द्विविधं भवति। इष्टलिङ्गं तु गुरुलिङ्गमाचारलिङ्गमिति द्विविधं भवति। एवं लिङ्गस्थलं षड्विधं भवति।

सा स्वतन्त्रस्वप्रकाशताशक्तिरेव क्रमादेषु लिङ्गेषु सूक्ष्मकार्यकरणप्रपञ्चोपादानकारणीभूतचिच्छक्त्यपरपर्यायप्रणवरूपशान्त्यतीतोत्तराख्यकलेति, आनन्दरूपपराशक्त्यपरपर्यायमयकारमयशान्त्यतीतकलेति, औन्मुख्यलक्षणादिशक्त्यपरपर्यायवाकाररूपशान्तिकलेति, सूक्ष्मक्रियालक्षणेच्छाशक्त्यपरपर्यायशिकाररूपविद्याकलेति, बहिर्मुखज्ञानशक्त्यपरपर्यायमकारमयप्रतिष्ठाकलेति, स्थूलोद्यमक्रियाशक्त्यपरपर्यायनकाररूपनिवृत्तिकलेति षड्रूपतामगमत्। एवं च महालिङ्गं तावत् सर्वपदार्थानुसन्धानलक्षणहृदग्ररूपत्वात् शुद्धानुसन्धातृरूपगोप्यमुखमित्युच्यते। प्रसादादिलिङ्गपञ्चकं तु क्रमेण शब्दादिप्रतिनियतपदार्थानुसन्धातृरूपेशानतत्पुरुषाघोरवामसद्योजाताख्यप्रकटपञ्चमुखमित्युच्यते एवंविधलिङ्गतत्त्वस्य सागरतरङ्गभङ्गिन्यायेनाभेदपर्यवसायिभेदप्रधानलक्षणशुद्धानुसन्धातृरूपत्वेनानुग्रहहेतुत्वादुपास्यमित्युच्यते।

एवमङ्गतत्त्वं च त्रिविधम्—स्वात्मगुरुलिङ्गजङ्गमानामैक्ययोगानुसन्धानलक्षणयोगाङ्गमिति, तदर्पितप्रसादपरमोपादेयस्वीकारसुखपरिणमनलक्षणभोगाङ्गमिति, गुरुलिङ्गजङ्गमेष्ववञ्चनीयपरित्यजनीयतनुमनोधनरूपत्यागाङ्गमिति। इदं च प्रत्येकं द्विविधं भवति। योगाङ्गं तु ऐक्यं शरणमिति भिद्यते। भोगाङ्गं तु प्राणलिङ्गि प्रसादीति भिद्यते। त्यागाङ्गं तु माहेश्वरं भक्तस्थलमिति भिद्यते।

एवं षड्विधाङ्गप्रकाशानां न्यूनीभावमापन्ना सा शक्तिरेव समरसभक्तिरित्यानन्दभक्तिरित्यनुभवभक्तिरित्यवधानभक्तिरिति नैष्ठिकाभक्तिरिति, श्रद्धाभक्तिरिति षड्विधभक्तिरूपतां भावज्ञानमनोबुद्ध्यहङ्कारचित्तलक्षणान्तःकरणषट्कतां श्रोत्रादिज्ञानेन्द्रियरूपतां शब्दादितद्विषयतृप्तिलक्षणषट्पदार्थतां तद्वाचकषडक्षरीरूपतां क्रियासाधनीभूतवागादिकर्मेन्द्रियरूपतां सूक्ष्मरूपाकाशादिभूतपञ्चकसमष्टिरूपतां सद्भावसुज्ञानसुमनोनिरहङ्कारसुबुद्धिसुचित्ताख्यषट्कररूपतां च प्राप्याङ्गमभवत्। एवंविधाङ्गतत्त्वस्य महेश्वरीयलीलाशक्तिपरिकल्पितसंकुचितचिदादिशक्तिस्वभावत्वेऽपि सूक्ष्मरूपमानसव्योमाद्युपाधिसंवलितत्वेनोर्ध्वंसृष्टिरूपविभागनिबन्धनभेदप्रधानलक्षणशुद्धविद्याप्रमातृरूपत्वादुपासकमित्युच्यते।

एवं च लिङ्गतत्त्वस्य शरणतत्त्वमङ्गम्, शरस्य लिङ्गं प्राणः। अनयोर्बीजवृक्षन्यायेन अन्योन्यसामरस्यमेव। एवमनादितः शरण एव लिङ्गं लिङ्गमेव शरण इति नूनम्। अथैवंविधशरणस्य स्वविमर्शलक्षणगुरुकटाक्षसंप्राप्तस्वात्मप्रत्यभिज्ञानशालित्वाद् एतन्मन एव प्रणवरूपमहालिङ्गम्। बाह्येन्द्रियलक्षणश्रोत्राद्येकैकेन्द्रियविषयशब्दादिसकलपदार्थग्रहणसाधनत्वेनान्तर्मुखत्वाद् नादसुनादमहानादरूपदेशिकवाक्यशास्त्रविवक्षाध्यवसायोक्तिरूपपश्यन्त्यादिक्रमेणानुग्रहात्मकप्रसादहेतुत्वात् शब्दग्रहणसाधनश्रोत्रमेव यकाररूपप्रसादलिङ्गम्, चरजङ्गमयोः पर्यायत्वात्। तस्य त्वक् सर्वाङ्गं व्याप्ता सती तत्र शीतादिस्पर्शसाधनत्वाद् वाकारमयजङ्गमलिङ्गम्, महाप्रकाश एव नेत्रगोलकं प्रविष्टः सन् सकलरूपपदार्थप्रकाशनसाधनत्वान्नेत्रमेव शिकारमयशिवलिङ्गम्, गुरोर्मन्त्रमूर्तित्वात् षडक्षरीमन्त्र एव मधुराम्लादिषड्रसरूपतां प्राप्त इति तादृङ्मन्त्रोच्चारणरसास्वादनसाधनत्वाज्जिह्वैव मकारमयगुरुलिङ्गम्, इडापिङ्गलाख्यनाडीद्वारा प्राणवायुसंचाराश्रयत्वात् सत्कर्माचरणहेतुभूतदेहशुद्धिरूपरेचकादिक्रमोत्पन्नप्राणायामाचरणसाधनत्वाच्च घ्राणमेव नकारमयमाचारलिङ्गमिति भण्यते। एवं लिङ्गलक्षणमवगन्तव्यम्।

अथ गुरुलिङ्गजङ्गमानामैक्यधिया भस्मरुद्राक्षादिशिवलाञ्छनेषु शिवशरणेषु च प्रीतिलक्षणभक्तिमानेव भक्तः,

माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः।
स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा॥

इति शङ्करसंहितोक्तेः, शिव एव श्रीगुरुलिङ्गजङ्गमात्मक इति निष्ठावानेव महेश्वरः, गुरुलिङ्गजङ्गमपादोदकप्रसादभूतिरुद्राक्षमन्त्रलक्षणाष्टावरणैस्तदन्तर्गताद्यपञ्चविधवर्तनपञ्चाचारेषु विस्मृतिशून्यत्वेन सावधानवानेव प्रसादी, व्याध्यादौ संप्राप्ते पादोदकप्रसादव्यतिरेकेण लिङ्गार्पितौषधं चायं न स्वीकरोतीति ताभ्यां विशिष्टो लिङ्गमेव प्राणः प्राण एव लिङ्गमित्यनुसंधानवानेव प्राणलिङ्गी, तादृशप्राणलिङ्गमेव पतिः स्वयमेव सतीति सतीपतिभावमापन्नः सन् सत्याः सत्यन्तरं नास्तीत्यन्यसतीसङ्गं परित्यज्य स्वचिच्छक्तिसंमेलनानन्दभरितः सन् निवृत्तिमार्गमवलम्ब्य भक्तिज्ञानवैराग्यसंपन्न एव शरण इत्युच्यते। एवंविधसतीपतिभावनिवृत्त्याविर्भावनिराभासः सन् विकल्पवैमुख्येन सर्वं शिवात्मकमिति विमृशन् शिखिकर्पूरयोगवद् अन्त-

मुंखमहालिङ्गैकलोलीभूत एवैक्यः। इत्यङ्गस्थलं विमर्शनीयम्। अत्र कर्पूरस्य भूतत्वरूपत्वात्, तस्य परम्परया तेजःकार्यत्वात्, कार्यनाशस्य कारणात्मना स्थितिरूपत्वाद् न स्वरूपहानिरिति शङ्कावकाशः। एवं च भक्तादिषड्विधशिवशरणानाम्, आचारादिषड्विधलिङ्गानां च संबन्धो विमर्शनीयः। एतदुक्तं भवति—

"आचारलिङ्गं घ्राणाख्यं भक्तस्थलसमाश्रयम्। निवृत्तिकलयोपेतं गन्धग्रहणसाधनम्॥ गुरुलिङ्गं तु जिह्वाख्यं महेशस्थलसंश्रयम्। प्रतिष्ठाकलयोपेतं रसग्रहणसाधनम्॥ शिवलिङ्गं तु नेत्राख्यं प्रसादिस्थलसंश्रयम्। विद्याकलासमोपेतं रूपग्रहणसाधनम्॥ त्वगाख्यं जङ्गमं लिङ्गं प्राणलिङ्गस्थलाश्रयम्। शान्त्याख्यकलयोपेतं स्पर्शग्रहणसाधनम्॥ प्रसादलिङ्गं श्रोत्राख्यं शरणस्थलसंश्रयम्। शान्त्यतीतकलोपेतं शब्दग्रहणसाधनम्॥ मानसं तु महालिङ्गमैक्यस्थलसमाश्रयम्। शान्त्यतीतोत्तरोपेतं सर्वग्रहणसाधनम्॥" इति।

अत्र मानसादीनां करणरूपत्वेऽपि घ्रातृत्वादिलक्षणचैतन्यस्य घ्रेयादिपदार्थस्वीकारसाधनत्वेन तदेकनिष्ठत्वाल्लिङ्गरूपत्वव्यपदेशः, अन्यथा घ्रातुर्घ्राणरसने वाग्गन्धग्रहणसाधनं स्यादिति तात्पर्यम्। भक्तादिलक्षणं तु स्कान्दे शङ्करसंहितायाम्—"सदाचारः शिवे भक्तिर्लिङ्गे जङ्गम एकधीः। लाञ्छने शरणे भक्तिर्भक्तस्थलमनुत्तमम्॥ परस्त्रियं परार्थं च वर्जितो भावशुद्धिमान्। लिङ्गनिष्ठानियुक्तात्मा माहेश्वरमहास्थलम्॥ लिङ्गार्पितपदार्थं च सुभोगी लिङ्ग आहितः। अनर्पितविवर्जी च प्रसादिस्थलमुत्तमम्॥ वायौ प्राणगुणे लिङ्गं लिङ्गे प्राणः समाहितः। सुखदुःखोभयं नास्ति प्राणलिङ्गिस्थलं भवेत्॥ पतिलिङ्गं सती चाहं हृदि युक्तः स्वयं प्रभुः। प्रापञ्चिकसुखं नास्ति शरणस्थलमुत्तमम्॥ षडूर्मयश्च षड्भावा नास्ति चाष्टविधार्चनम्। निर्भावो निजलिङ्गैक्यः शिखिकर्पूरयोगवत्॥" इति। अत्र शरणस्य प्रापञ्चिकसुखं नास्तीत्यनेन स्त्रीपरिग्रहो नहीति सूचितम्।

एवं चात्राङ्गस्थलस्य लिङ्गस्थलान्तर्गतत्वात्, शान्त्यतीतोत्तराख्यकलोपेतमहासादाख्यमहालिङ्गतत्त्वमेकम्, शिष्टपञ्चलिङ्गगतकलापञ्चकं शिवसादाख्यामूर्तिसादाख्यमूर्तिसादाख्यकर्मसादाख्यकर्तृसादाख्यरूपसादाख्यपञ्चकं मिलित्वा लिङ्गतत्त्वान्येकादशेति संकेतः। एवं सति निष्कलघनलिङ्गतत्त्वस्य महालिङ्गं मानसाख्यान्तर्मुखम्। प्रसादादिलिङ्गपञ्चकं बाह्यमुखपञ्चकम्। सादाख्यपञ्चकं तु ईशानाद्यपरपर्यायनामधेयपञ्चकमिति तात्पर्यम्।

अथ पुनस्तस्य महेशितुः स्थूलप्रपञ्चनिर्माणलीलायाम् आचारलिङ्ग-निष्ठक्रियाशक्त्यपरपर्यायनिवृत्तिकलावशाद् अहङ्कारादिभूम्यन्तत्रयोविंशति-तत्त्वमूलकारणीभूतसत्त्वरजस्तमोगुणात्मकप्रकृत्यपरपर्यायमायातत्त्वमुत्पन्नं भवति। तत्र सात्त्विकादिगुणप्रविष्टचैतन्यमेव रुद्रविष्णुब्रह्माख्यया व्यवह्रियते। क्रमेण वह्निसूर्यसोमाश्चैतदन्तर्गता ब्रह्मक्षत्रवैश्यशूद्राख्याश्चत्वारो वर्णाश्च, "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागतः" इति भगवतैव भाषितत्वात्। कथं गुणत्रयाद् वर्णचतुष्टयोत्पत्तिरिति नाशङ्कनीयम्, "विश्वाधिको रुद्रो महर्षिः पुरुषो वै रुद्रः सन्महो नमः" इति श्रुतेः शुद्धस्फटिकसंकाशत्वाच्च सत्त्वगुणप्रविष्टचैतन्यरूपमहर्षिरुद्रांशीभूतब्राह्मणोत्पत्तिः सत्त्वगुणात्, रजोगुणस्य मिश्रितत्वात् तद्गतसत्त्वांशतस्तु वैष्णवराजन्योत्पत्तिः, तद्गत-तमोंऽशेन ब्रह्मांशीभूतवैश्योत्पत्तिः, तमोगुणादिन्द्रांशीभूतशूद्रोत्पत्तिः।

अन्ये देवाः संकराः। उक्तं च पाराशरोपपुराणे—"संकराः सर्वदेवाः स्युर्वृषलश्च पुरन्दरः। पितामहस्तु वैश्यः स्यात् क्षत्रियः परमो हरिः॥ ब्राह्मणो भगवान् रुद्रः सर्वेषामुत्तमोत्तमः। ब्रह्मभूतस्य रुद्रस्य ब्राह्मण्यं नैव हेतुजम्॥" इति।

ननु पुराणेषु सर्वत्र विष्णुः सात्त्विकः, रुद्रस्तामस इति स्मर्यमाणत्वात् कथमुक्तार्थसिद्धिरिति चेन्न, विष्णुरुद्रयोः सात्त्विकतामसोक्तेः पालनसंहारोपाधिकृतत्वात्। स्वभावतस्तु विष्णुस्तामसः रुद्रः सात्त्विक एव। तदुक्तं भागवत एव—"सत्त्वं रजस्तम इति प्रकृतेर्गुणाः स्युर्युक्तः परः पुरुष एव इहास्य धत्ते।………स्थित्यादयो हरिविरिञ्चिहरेतिसंज्ञाः॥" इति, "न ते गिरित्राखिललोकपालविरिञ्चिवैकुण्ठसुरेन्द्रगम्यम्। ज्योतिः परं यत्र रजस्तमश्च सत्त्वं न यद् ब्रह्म निरस्तभेदम्॥" इति। अत्र प्रथमश्लोके क्रमालङ्कारेण विष्णोः सात्त्विकत्वं रुद्रस्य तामसत्वं च पालनाद्युपाधिकृतमिति स्पष्टमेव प्रतीयते। कालकूटविषोल्बणप्रस्तावे रुद्रं प्रति न ते गिरित्रेति ब्रह्मप्रोक्तवचने क्रमालङ्कारेण वैकुण्ठस्य तमोगुणत्वं सुरेन्द्रापरपर्यायरुद्रस्य सात्त्विकत्वं च स्वाभाविकं प्रतीयते, शुक्लवर्णत्वाद्रुद्रस्य, कृष्णवर्णत्वाद्विष्णोरिति।

अस्मिन्नर्थे स्कान्दपुराणे—"शौक्ल्यं सत्त्वगुणाज्जातं रागो जातो रजोगुणात्। कार्ष्ण्यं तमोगुणाज्जातमिति विन्द्यात् समासतः॥ यस्य मायागतं सत्त्वं शरीरं स्यात्तमोगुणः। संहाराय त्रिमूर्तीनां स रुद्रः स्यान्न चापरः॥

तथा यस्य तमः साक्षाच्छरीरं सात्त्विको गुणः। पालनाय त्रिमूर्तीनां स विष्णुः स्यान्न चापरः॥" इति स्मृतत्वाच्च। अत्र ब्रह्मादिकीटान्ताः सकला-स्त्रिमलिनः, विष्णुः प्रलयाकलो द्विमली प्रलये कलाशून्यत्वात्, ज्ञानी रुद्रो हि विज्ञानाकलः कलाशून्यत्वात् सदा ज्ञानी संहाराय मायैकमली। ऊर्ध्वकोटि-गतत्यागाङ्गप्रकाशस्तु कार्मैकमलवासनाविशिष्टत्वान्मन्त्रः, भोगाङ्गाभासस्तु कार्ममलवासनाक्षयौन्मुख्यरूपत्वान्मन्त्रेश्वरः, योगाङ्गप्रतिभासस्तु प्राप्त-कार्ममलवासनाक्षयरूपत्वान्मन्त्रमहेश्वर इति भण्यते। एवमेते षड्विधप्रमा-तारः। निष्कलघनलिङ्गप्रकाशस्तु अनुत्पन्नमलोल्लासपूर्णाहंस्फुरणमय इति विवेकः। अत्रान्योन्याभावलक्षणभेदप्रधानरूपमायाकार्यकोटिप्रविष्टमङ्गतत्त्वं पञ्चविंशतिसंख्याकमिति वोध्यम्। अत्रान्तःकरणत्रयं ज्ञानेन्द्रियपञ्चकं च सत्त्वकार्यम्, कर्मेन्द्रियपञ्चकं राजसम्, तन्मात्रपञ्चकं भूतपञ्चकं च तामस-मित्यवगन्तव्यम्।

अत्र—"बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते" इति भगवदुक्तेरनेक-जन्मार्जितशिवपूजादिसत्कर्ममहिम्ना इह जन्मनि गुरुकटाक्षवशादेवंविध-षट्स्थलब्रह्मज्ञानं कश्चिदेव लब्ध्वा मुक्तो भवतीति नूनम्। अथोक्तलक्षण-षट्स्थलब्रह्मविच्छरणस्य गोप्यादिसद्यान्तषण्मुखसमुदितज्योतिर्बिन्द्वर्धचन्द्र-कुण्डलदण्डतारकाकारषडक्षराण्येव षड्भूतानि भूत्वाऽङ्गतामभजन्निति तदङ्गे षट्प्रणवरूपेष्टलिङ्गम्, सुस्थिरमासे तत्पीठे ह्याचारलिङ्गम्, खण्डिकावरणे गुरुलिङ्गम्, वर्तुले शिवलिङ्गम्, गोमुखे जङ्गमलिङ्गम्, योनिस्थाने प्रसादलिङ्गम्, गोलके महालिङ्गम्—इत्येवं षड्विधलिङ्गानां प्रकाशमानत्वात्। तत्र भक्तस्तावदाचारलिङ्गस्य क्रियाशक्तियुक्तस्य श्रद्धा-भक्त्या सुचित्तहस्तेन गन्धपदार्थं धृत्वा नकारमन्त्रमनुस्मरन् घ्राणेन्द्रियमुखे समर्प्य तत्प्रसादभोगी भूत्वा परिणामी भवति। महेश्वरो हि गुरुलिङ्गस्य ज्ञानशक्तियुक्तस्य नैष्ठिकभक्त्या सुबुद्धिहस्तेन रसपदार्थं धृत्वा मकारमन्त्र-मनुस्मरन् रसनेन्द्रियमुखे समर्प्य तत्प्रसादं स्वीकृत्य परिणामी भवति। प्रसादी तु शिवलिङ्गस्य इच्छाशक्तियुक्तस्य सावधानभक्त्या निरहङ्कार-हस्तेन रूपपदार्थं परिगृह्य शिकारमन्त्रमनुस्मरन् नेत्रेन्द्रियमुखे समर्प्य तत्प्रसादभोगी भूत्वा परिणामी भवति। प्राणलिङ्गी तु औन्मुख्यशक्ति-युक्तस्य जङ्गमलिङ्गस्य अनुभावभक्त्या सुमनोहस्तेन स्पर्शपदार्थं धृत्वा वाकारमन्त्रमनुस्मरन् त्वगिन्द्रियमुखे समर्प्य तत्प्रसादभोगी भूत्वा परिणामी भवति। शरणस्तु पराशक्तियुक्तस्य प्रसादलिङ्गस्य आनन्दभक्त्या सुज्ञान-

हस्तेन शब्दपदार्थं धृत्वा यकारमन्त्रमनुस्मरन् श्रोत्रेन्द्रियमुखे समर्प्य तत्प्रसादं भुक्त्वा परिणामी भवति । ऐक्यस्तु चिच्छक्तियुक्तस्य महालिङ्गस्य समरसभक्त्या सद्भावहस्तेन तृप्तिपदार्थं धृत्वा प्रणवमन्त्रमनुस्मरन् मनोमुखे समर्प्य तत्प्रसादतृप्तः सन् परिणामी भवति ।

एवं समर्पितवतः शरणस्य ज्ञप्ते ब्रह्मणि विश्रमितत्वात् "ओङ्कारो वदनं देवि नमःकारौ भुजद्वयम् । शिकारो देहमध्यस्तु वायकारौ पदद्वयम् ॥ पीठं पादादिजान्वन्तमानाभेर्मध्यमीरितम् । हृदयान्तं वर्तुलं स्यात् कण्ठान्तं गोमुखं तथा ॥ भ्रूमध्यान्तं लिङ्गकण्ठो मस्तको लिङ्गमस्तकः ॥" इति वचनात् तच्छरीरस्यापि मन्त्रलिङ्गरूपत्वादाचरणीयं किमपि नास्त्येव, तथापि लिङ्गाङ्गसामरस्यप्रकारो विभावनीयः । तथाहि—पृथ्वी भक्ताङ्गं भूत्वा तत्रैव लीना भवति, चिद्धृतिरूपत्वात् । वारि महेश्वराङ्गं भूत्वा तत्रैव लीनम्, चिदाप्यायनरूपत्वात् । तेजः प्रसाद्यङ्गं भूत्वा तत्रैव लीनम्, चिदुज्वलनरूपत्वात् । वायुः प्राणलिङ्ग्यङ्गं भूत्वा तत्रैव लीनः, स्वतन्त्रतालक्षणस्पन्दनरूपत्वात् । व्योम शरणाङ्गं भूत्वा तत्रैव लीनम्, चिद्व्याप्तिरूपत्वात् । वेद्यसंस्कारात्मकबिन्दुर्हि ऐक्याङ्गं भूत्वा तत्रैव लीनः । एवं भक्तस्याचारलिङ्गाङ्गत्वात् स तत्रैव लीनः । गुरुर्लिङ्गाङ्गत्वाद् महेश्वरस्य स तत्रैव लीनः । प्रसादी शिवलिङ्गाङ्गत्वात् स तत्रैव लीनः । प्राणलिङ्गी जङ्गमलिङ्गाङ्गत्वात् स तत्रैव लीनः । शरणः प्रसादलिङ्गाङ्गत्वात् स तत्रैव लीनः । ऐक्यो हि महालिङ्गाङ्गत्वात् स तत्रैव लीन इति विमर्शनीयम् ।

अथाचारलिङ्गं गुरुलिङ्गे, गुरुलिङ्गं शिवलिङ्गे, शिवलिङ्गं जङ्गमलिङ्गे, जङ्गमलिङ्गं प्रसादलिङ्गे, प्रसादलिङ्गं महालिङ्गे, महालिङ्गं घनलिङ्गैकलोलीभूतं सदखण्डामर्शपरिबृंहितं सदास्ति, लिङ्गषट्कस्य चिदानन्दप्रतिफलनकलनात्मकत्वादिति ।

एवंविधलिङ्गाङ्गसामरस्यं विवर्तवादे न संभवति, मानसादिभूम्यन्तप्रमेयषट्कस्याविद्याकार्यत्वेन मिथ्यात्वादिति विमर्शनीयम् । एवंत्रिषट्स्थलज्ञानवानेव सर्वोत्कृष्टः । उक्तं च शाङ्करसंहितायाम्—"क्रिमिकीटपतङ्गेभ्यः पशवः प्रज्ञयाऽधिकाः । पशुभ्योऽपि नराः श्रेष्ठास्तेषु श्रेष्ठा द्विजातयः ॥ द्विजातिष्वधिका विप्रा विप्रेषु क्रतुबुद्धयः । क्रतुबुद्धिषु कर्तारस्तेभ्यः संन्यासिनोऽधिकाः ॥ तेभ्यो विज्ञानिनः श्रेष्ठास्तेषु शङ्करपूजकाः । तेषु श्रेष्ठा

महाभाग मम लिङ्गाङ्गसङ्गिनः ॥ लिङ्गाङ्गसङ्गिष्वधिकः षट्स्थलज्ञानवान् भवेत् । तस्मादभ्यधिको नास्ति त्रिषु लोकेषु सर्वदा ॥" इति । अत्र ब्राह्मणस्य लिङ्गधारणं कथमश्रौतत्वादिति नाशङ्कनीयम्, "पाणिमन्त्रं पवित्रं स्यादिति श्रुतिविनिर्णयः" इति तत्रैवोक्तत्वात्, "त्रियम्बकं यजामहे" इति श्रुतत्वाच्च । "यज देवपूजासंगतिकरणदानेषु" इति धातोर्लिङ्गाङ्गसंबन्धस्य प्राप्तत्वादिति संक्षेपः ।

अयमपरो विशेषः । उक्तविधषट्त्रिंशत्तत्त्वात्मकस्य विश्वस्य "विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनी श्रुतौ ॥ तत्र पञ्चाक्षरी तस्यां शिव इत्यक्षरद्वयम् ॥" इति पौराणिकोक्तेः शिव इत्यक्षरद्वयस्य जीवरत्नत्वात् तदन्तर्भावप्रकारोऽपि विमर्शनीयः । ननु तत्त्वानामसाधारणलक्षणं विना तत्प्रतिज्ञानासंभवात् कथं तदन्तर्भावप्रकारो विमर्शनीय इति चेदुच्यते, अत्रोक्तलिङ्गतत्त्वेषु सादाख्यानां नामधेयमात्रत्वात्, कलानां विमर्शांशित्वात्, लिङ्गानां प्रकाशान्तर्गतत्वात् तदेकरूपमेव । एवं च विमर्शपरिबृंहितं ब्रह्मैव स्वक्रीडार्थं लीलया शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृत्यहङ्कारबुद्धिमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निसलिलभूमय इति षट्त्रिंशत्तत्त्वात्मना भिद्यते । तथाहि—

"अनादिनिधनाच्छान्ताच्छिवात् परमकारणात् । इच्छाशक्तिर्विनिष्क्रान्ता ततो ज्ञानं ततः क्रिया ॥ तयोत्पन्नानि भूतानि भुवनानि चतुर्दश ॥" इत्यागमोक्तेः, "अर्धं क्रिया भवति दक्षिणमन्यदर्धं ज्ञानं समत्वमनयोरपि मध्यमिच्छा । इच्छैव मूलमुदितान्तरबाह्यगत्या ज्ञानं क्रिया च खलु मूलमिहाङ्कुरस्य ॥" इति मातृकाचक्रविवेकस्थितेश्च सृष्ट्युन्मुखस्य महेश्वरस्य स्वेच्छाशक्त्यन्तरङ्गभूतज्ञानांशप्रविष्टप्रथमोद्योग एव भाविचराचरप्रपञ्चनिमित्तकारणं सर्वज्ञसर्वकर्तृनीलकण्ठोमापतित्रिलोचनत्वादिलक्षणं शिवतत्त्वमिति । इदमेव ईशानमन्त्रप्रतिपाद्यसदाशिवतत्त्वम्, "ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्" इति श्रुतेः ।

अस्यायमर्थः— सर्वविद्यानां चतुष्षष्टिकलानाम्, ईशानः अधिपतिः, अनेन सर्वज्ञत्वमुक्तम् । सर्वभूतानां भवनशीलानां चराचरप्राणिनामीश्वरो

नियामकः, एतेन सर्वकर्तृत्वमुक्तम् । ब्रह्माधिपतिः ब्रह्मणां तत्पुरुषादिसद्यो-जातान्तानामीशरुद्रविष्णुब्रह्मणां तिरोधानादिकृत्यचतुष्टयनियमितानामधिपतिस्तज्जनकत्वेन तन्नियामकः । ब्रह्मणोऽधिपतिः ब्रह्मणः तपसः अधिपतिः । ब्रह्मा परमानन्दपरिबृंहितः, शिवः स्वच्छप्रकाशः, "वश कान्तौ" इति धातोः । "अथवाऽनन्तकल्याणगुणैकनिधिरीश्वरः ॥ शिव इत्युच्यते सद्भिः शिवतत्त्वार्थवेदिभिः ॥" इति पौराणिकोक्तेः कल्याणगुण-परिपूर्णो वा । सदाशिवः सत् आ शिव इति विच्छेदेन सच्चिदानन्दरूपः, आकारस्य आनन्दवाचकत्वात्, प्रणवैकलोलीभावेन प्रतीयमानत्वात्, तत्प्रतिपाद्यः, प्रणवांशीभूताकारस्य प्रातिलोम्येनोमायां प्रतीयमानत्वात् तत्पतिश्च । एवंभूतः सदाशिवो मे मम तिरोधानकलानिष्ठहृदयस्य अस्तु अनुग्रहप्रदो भवत्विति ।

एतन्मन्त्रान्तरगतत्वेन शैवसप्ताक्षरी स्फुरतीति विमर्शनीयम् । इदमेव सर्वैश्वर्यविश्रान्तिस्थानरूपं परमशिवस्य उपचारात् तत्त्वेषु परिगणना-मात्रम् । इदमेव मुमुक्षूपास्यम् । एतत्प्रसादेनैव परशिवैकलोलीभावलक्षणा परममुक्तिरित्यवगन्तव्यम् । अयमेव जगद्गुरुः, "ईशानः सर्वविद्यानां स एवादिगुरुर्बुधाः । तस्य शिष्यो महाविष्णुर्दिव्यज्ञानमहोदधिः ॥" इति पौराणिकोक्तेर्नारायणाविर्भावकारणं च । अथ स्वेच्छाशक्तेर्बहिरङ्गरूपक्रियांश-प्रविष्टोद्योग एव भाविविश्वोपादानकारणं शक्तितत्त्वं भवति । एतत्पुंभाव-विलास एव नारायणः । अथैवंविधशक्तितत्त्वमेव स्वेच्छाशक्त्यन्तरङ्गभूतज्ञान-शक्त्युद्रेकावस्थाप्रविष्टं सद् जलाधिवासितचणकादिवत् पूर्वावस्थावैलक्षण्ये-नाङ्कुरायमाणेदन्ताप्रथमरूपं गर्भावरकवत् स्वाहंतयाऽऽच्छाद्य वर्तमानविश्व-स्फुरणरूपं सादाख्यरुद्रतत्त्वं सदाशिवांशीभूतम् । अथ तच्छक्तितत्त्वमेव स्व-क्रियाशक्त्युद्रेकदशायां प्रविष्टं सत् कृतवस्तुवदङ्कुरितमिदन्तारूपं स्वाहन्त-याऽऽच्छाद्य स्थितविश्वस्फूर्तिमयमीश्वरतत्त्वं शक्तितत्त्वपुंभावलीलास्वरूप-नारायणाख्यम् । अथ क्रियाप्रधानेदन्तायाः संविद्रूपाहन्तान्तर्गतत्वेन भास-मानत्वाद् विभागनिबन्धनभेदघटितसागरतरङ्गन्यायेनाहन्तेदन्तयोरैक्यप्रति-पत्तिर्ब्रह्मापरपर्यायशुद्धविद्यातत्त्वं भवति । गुरुशास्त्रलब्धनिर्मलसंवित्तिरितीति यावत् । अथैवंविधशुद्धविद्यातत्त्वमेवाण्डरसन्यायेन स्वान्तर्लीनेषु भवनक्रियो-न्मुखेषु भावेष्वन्योन्याभावनिबन्धनभेदबुद्धिप्रधानं सद् मायातत्त्वं भवति ।

"कलासप्तदशी देवी स्वान्तर्लीनचराचरा" इत्यागमोक्तेः, "इदं सर्वं जगत्पूर्वं प्रलये परमेश्वरे। मायाभिन्ने स्वमायाख्यकारणाभेदरूपतः॥ वर्तते वासनारूपेणैव नाभावरूपतः।" इति पराशरोपपुराणवचनाच्च स्वान्तर्लीन-चराचरात् परमेश्वरात् काष्ठयोगेन वह्नेर्विस्फुलिङ्गाविर्भाववत् तदिच्छाशक्ति-वशाद् विभक्तः सन् उक्तलक्षणमायाशक्तौ प्रतिबिम्बगत्या प्रविष्टो यः प्रकाशः, स पुरुषतत्त्वं भवति। अस्य स्वतन्त्रप्रकाशमहेश्वराद्विच्छिन्नत्वेन मायाक्रान्त-त्वान्नाहमीश्वर इत्यात्मन्यनात्मताज्ञप्तिराविर्भवति, तथैवानात्मनि देहादावा-त्मताज्ञप्तिश्च। एतद् द्वयमाणवम्। तत एव शुभाशुभवासनारूषितकार्ममल-मन्योन्याभावभेदलक्षणमायिकमलं च प्राप्तं भवति। एवंविधमलत्रयशृङ्खलि-तत्वादेव संसारीत्युच्यते। अस्य पुरुषस्य महेश्वराद् विभक्तत्वेन मायाप-हृतैश्वर्यत्वाद् असंकुचिततत्कर्तृताशक्तिरेव किञ्चित्कर्तृतालक्षणकलातत्त्वं भवति। ज्ञातृताशक्तिरेव किञ्चिज्ज्ञत्वलक्षणमविद्यातत्त्वं भवति। पूर्णताशक्ति-रेवापूर्णतां प्राप्य स्रक्चन्दनवनितादिविषयासक्तिलक्षणं रागतत्त्वं भवति। तथा नित्यता ह्यनित्यतां प्राप्य भूतभविष्यद्वर्तमानरूपक्रमाकरकालतत्त्वं भवति। तथा व्यापकता ह्यव्यापकतां प्राप्य मयेदं कर्तव्यमिति नियमहेतु-भूतनियतितत्त्वं भवति। एवंविधकलादिपञ्चकमस्य पुरुषस्य शङ्करशासना-दपरिच्छिन्नस्वस्वरूपावरणहेतुत्वात् कञ्चुकमित्यागमेषूच्यते।

अथौन्मुख्यगर्भितेच्छाशक्तिरेव प्रतिस्फुरणगत्या स्वगतज्ञानक्रियान्योन्या-भावलक्षणमायाप्रतिस्फुरणरूपसुखदुःखमोहप्रदसत्त्वरजस्तमसां साम्यावस्था-लक्षणमहङ्कारादिभूम्यन्तत्रयोविंशतितत्त्वमूलकारणं प्रकृतितत्त्वं भवति। अथ अहं ममेदमित्यभिमानसाधनमहङ्कारतत्त्वं भवति। निश्चयहेतुर्बुद्धितत्त्वं भवति। स्थाणुर्वा पुरुषो वेति संकल्पविकल्पसाधनं मनस्तत्त्वम्। समीचीन-कल्पस्थाणुत्वबुद्धेर्विपरीतत्वात् पुरुषत्वबुद्धेर्विकल्पत्वम्। एतत्त्रितयं शरी-रान्तः स्थित्वा सुखादिवेद्यावधानकरणरूपत्वादन्तःकरणम् इच्छाशक्ति-प्रधानम्। अथ शरीरबाह्यलग्नं सत् शब्दज्ञानैककरणं श्रोत्रम्, स्पर्शज्ञानैक-करणं त्वक्, रूपज्ञानैककरणं चक्षुः, रसज्ञानैककरणं रसनम्, गन्धज्ञानैककरणं घ्राणम्। एतत्पञ्चकं ज्ञानशक्तिप्रधानत्वाज्ज्ञानेन्द्रियमित्युच्यते। अन्तःकरणस्य शब्दाशब्दादिसाधारणत्वादेतस्य शब्दाद्यसाधारणत्वान्नातिव्याप्तिः।

अथोच्चारणक्रियाहेतुर्वाक्, दानादानादिक्रियाहेतुः पाणिः, गमनागमन-क्रियासाधनं पादम्, भुक्तजीर्णमलपरित्यागसाधनं पायुः, रेतोमूत्रपरित्याग-

क्रियासाधनमुपस्थकम् । एतत्पञ्चकं क्रियाशक्तिप्रधानत्वात् कर्मेन्द्रियमित्युच्यते । एतत्करणचतुर्दशकमिच्छाज्ञानक्रियात्मकमित्यवगन्तव्यम् । अथ श्रोत्रैकवेद्यः शब्दः, त्वगेकवेद्यः स्पर्शः, नेत्रैकवेद्यं रूपम्, रसनैकवेद्यो रसः, घ्राणैकवेद्यो गन्धः । एतेषां ध्वनिवर्णशीतोष्णनीलपीतमधुराम्लसुरभ्यसुरभित्वादिविभागशून्यत्वेन सामान्यरूपत्वात् तन्मात्ररूपत्वेन व्यपदेशः । अथ मरुदग्न्यम्बुभूमीनामवकाशप्रदं शब्दैकगुणकमाकाशम्, कम्पभ्रमणशोषणवेगवान् स्पर्शैकगुणो वायुः, दाहकं पाचकं रूपवत् तेजः, अन्तश्चन्द्रादिशीततेजसि दाहकत्वाभावेऽपि सस्यादिवर्धनरूपपाचकत्वस्थितेर्नाव्याप्तिः । द्रावकं प्लावकमाप्यायकं रसैकगुणकं सलिलम्, गन्धैकगुणकं जडतत्त्वाधारकं छेद्यं पाच्यं भूतत्त्वमिति । एतान्याकाशादीनि महाभूतानीत्युच्यन्ते ।

अत्रैवंविधषट्त्रिंशत्तत्त्वेषु शिवादिशुद्धविद्यान्तमङ्कुरायमाणाङ्कुरितविश्वरूपत्वादपरम् । तस्याहन्तयेच्छादितत्त्वात्परम् । एवं परापरम् । मोक्षहेतुत्वात् तुरीयम् । सागरतरङ्गन्यायेनाभेदपर्यवसायिविभागनिबन्धनभेदबुद्धिप्रधानरूपत्वात्, मायातत्त्वस्य बन्धहेतुत्वात्, स्थूलविश्वमयत्वाच्च अपरम्, अन्योन्याभावनिबन्धनभेदबुद्धिरूपत्वात् । अत्र मनोबुद्ध्यहङ्कारप्रकृतिसहितपुरुषाय श्रोत्रादिभूम्यन्तविंशतितत्त्वानि जाग्रदवस्थाप्रविष्टानि, स्पर्शवाच्यत्वात् । कलादिपञ्चकं स्वप्नदशाप्रविष्टम्, अन्तःस्थितत्वेन तद्वाच्यत्वात् । मायैका सुप्तिदशातत्त्वम्, मोहरूपत्वादिति विवेकः ।

ननु—"पञ्चविंशतिरात्मा भवति" इति श्रुतेस्तत्त्वानां पञ्चविंशत्या परिमितत्वात् कथं षट्त्रिंशद्रूपत्वमिति चेन्न, इत्थम्, षोडशपदार्थानां सप्तपदार्थान्तर्भाव इव । तथाहि कलादीनां मायाकार्यत्वेन मायादिषट्कञ्चुकस्यापि कञ्चुके पुरुषान्तर्गतत्वात्. मायादिनियत्यन्तस्य तत्कञ्चुकत्वेन तदन्तर्गतत्वात्, प्रकृत्यादिमानसान्तचतुष्टयस्य तदन्तःकरणरूपत्वात्, प्रकृतेश्चित्तापरपर्यायत्वात्, श्रोत्राद्युपस्थान्तानां तदीयज्ञानकर्माक्षरूपत्वात्, तन्मात्रपञ्चकस्य तद्भोज्यरूपत्वात्, भूतपञ्चकस्य तच्छरीरत्वात्, शिवादिपञ्चकस्य तूष्माक्षरवाच्यत्वात्, ऊष्मणां शक्तिरूपत्वात्, शक्तीनां परमशिवस्वभावत्वेन तदीयशुद्धानुसन्धानरूपत्वेन तदेकरूपत्वान्न विरोध इति विवेकः ।

एवंविधषट्त्रिंशत्तत्त्वात्मकं विश्वम्–"शिवो वा प्रणवः प्रोक्तः प्रणवो वा शिवात्मकः ॥ वाच्यवाचकयोर्भेदो नात्यन्तं विद्यते क्वचित् ॥" इति पौराणिकोक्तेः, "सदाशिवोऽम्" इति श्रुतेः, "अहमित्यक्रमाक्रान्तजगत्त्रितय-

मण्डलः । वर्तते देवि वीरेन्द्र इति शाम्भवनिर्णयः ॥", "अकारः सर्ववर्णाग्य्यः प्रकाशः परमः शिवः । हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तितः ॥ अनयोः समरसाकारादहमित्येव निर्मलः ॥" इत्यागमोक्तेः, "अहमस्मि प्रथमजा" इत्यादिश्रुतेश्च मूलप्रणवैकविग्रहकपूर्णाहन्तात्मकशिवे मयूराण्डरसन्यायेन सामरस्येन संक्षिप्तम् ।

तथाहि शिव इत्यत्र वर्णचतुष्टयस्य भासमानत्वात्, त्रिंशिकाशास्त्रस्थित्या वकारस्य मायातत्त्ववाचकत्वात्, मायान्तैकत्रिंशत्तत्त्वानि तद्वाचककादिवान्ताक्षराणि च वकारान्तर्गतानि, कलादिभूम्यन्तत्रिंशत्तत्त्वानां तत्कार्यत्वात्, "वाय्यग्निसलिलेन्द्राणां धारणानां चतुष्टयम्" इत्युक्तत्वात् । शुद्धविद्यादिशक्त्यन्ततत्त्वचतुष्टयं तद्वाचकशवर्गश्च शकारेऽन्तर्भूतः, "तदूर्ध्वं शादिविख्यातं पुरस्ताद् ब्रह्मपञ्चकम्" इत्युक्तत्वात् । अकारे त्वनुग्रहात्मकषोडशकलापरिपूर्णसदाशिवतत्त्वम्, तत्कलावाचकषोडशस्वराश्चान्तर्गताः । शकारमस्तकस्थितेकारे त्वेतत्करणीभूततच्छक्तिश्चकास्ति, अनुत्तरादिषट्स्वरशक्तिष्विकारस्येच्छाविधानात् । समष्ट्या परमशिव इति विश्वं शिवाद्वैतकल्पपादपमञ्जरीरूपं विमर्शनीयम् ।

एवमहमित्यत्रापि, अत्र मकारस्य पुरुषतत्त्ववाचकत्वात्, "पृथिव्यादीनि तत्त्वानि पुरुषान्तानि पञ्चसु ॥ क्रमात् कादिषु वर्गेषु मकारान्तेषु सुव्रते ॥" इत्युक्तत्वात्, मायान्ततत्त्वानि पुरुषेऽन्तर्गतानि, "पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्" इति गीतत्वात् । अन्यत् सर्वं पूर्ववत् । कारणीभूता शक्तिस्तु हकारादेव, तस्य विमर्शवाचकत्वात्, तथा प्रदर्शितत्वात् । एवमोमित्यत्रापि तस्याकारोकारमकाररूपत्वात्, उकारस्य हकारसूक्ष्मत्वेन त्रिंशिकातत्त्वविवरणे प्रकटीकृतत्वात् । अन्यत् पूर्ववत् । एवमों शिवोहमेकार्थविश्रान्तत्वेन मातृकासंग्रहरूपत्वे श्रौतत्वाच्च, महेश्वरप्रतिपादकत्वेन च महामन्त्ररूपत्वात् । मुमुक्षुरेवंविधानुसंधानवानेव भवेत्, "तमेव विद्वानमृत इह भवति" इति श्रुतेः ।

एवमुक्तक्रमेण शिवसूत्रसंप्रतिपन्नदृक्क्रियात्मकचैतन्यप्रतिपादकब्रह्मसूत्रषट्स्थलब्रह्मषट्त्रिंशत्तत्त्वमहामन्त्रपरिज्ञानवान् इह जन्मनि अस्मिन्नेव देहेऽमृतो भवति । आहारव्यवहारादिना लौकिकवद् वर्तमानोऽपि जन्मान्तराभावाज्जीवन्मुक्तः । पिण्डपातानन्तरं सर्वज्ञतादिशक्तीनां विकासात् साक्षान्मुक्तो भवतीति नूनम् ।

ननु अस्य मन्त्रस्य पुरुषसूक्तान्तर्गतत्वात्, इतः पूर्वं दृक्क्रियात्मकचैतन्यस्य षट्स्थलब्रह्मणः षट्त्रिंशत्तत्त्वानां महामन्त्रस्य चाप्राप्तत्वात् कथमुक्तार्थसिद्धिरिति चेत्, "सहस्राक्षः" इति, "स भूमिं विश्वतो वृत्त्वा अत्यतिष्ठद्दशाङ्गुलम् । उतामृतत्वस्येशानः । एतावानस्य महिमा अतो ज्यायांश्च पूरुषः" इति श्रुतत्वात्, सहस्राक्षत्वप्रकटनेन ज्ञातृताशक्तेः, ईशान इत्यन्तेन विश्वतदुत्तीर्णतया भवनमोक्षकर्तृतालक्षणक्रियाशक्तेः, एतावानस्य महिमेत्यनेन जडजीवलक्षणज्ञानक्रियास्वतन्त्रचैतन्यस्य चोपात्तत्वात्, अतो ज्यायानित्युक्तत्वात्, "चैतन्यं दृक्क्रियारूपं शिवस्य परमस्य यत् । स्वातन्त्र्यमेतदेवात्मा ततोऽसौ परमः शिवः ॥" इति शिवसूत्रवार्त्तिकस्थितेस्तदेकार्थत्वात्, "पादोऽस्य विश्वा भूतानि" इति श्रुतेः षट्त्रिंशत्तत्त्वानां तदन्तर्गतत्वात्, 'त्रिपादस्यामृतं दिवि त्रिपादूर्ध्वमुदैत् पुरुषः" इति श्रुतत्वेन षट्स्थलब्रह्मणां महामन्त्रतमस्य च प्राप्तत्वात् ।

अथैवंविधपरामर्शवत आलाप एव जपः, तत्प्रवृत्तिरेव व्रतम्, "कथा जपः", "शरीरप्रवृत्तिर्व्रतम्" इति शिवेन सूचितत्वात् । तस्मात् सर्वस्यापि शिवाक्षरचतुष्टयसंपन्नत्वात् शिवम् ॥

इति श्रीप्रकाशविमर्शसामरस्यलक्षणद्वैताद्वैतसमरस-
लीलासपरिबृंहितब्रह्मविद्याचार्यनाथानन्दमुनीन्द्र-
चन्द्रसूक्तिसुधाकिरणप्रसरणविकसितहृत्कैरव-
कोरकस्वप्रभानन्दविरचितेयं शिवाद्वैत-
मञ्जरी संपूर्णतामवाप्ता पूर्णिमा-
चन्द्रिकेव सहृदयाह्लादनं
वितन्वती विजयतेतरां
स्वस्ति श्रीः ॥

स्थलादर्शपट

- स्थल (ब्रह्म)
  - लिङ्गस्थल (ईश)
    - भावलिङ्गस्थल (ईश्वर)
      - प्रसादलिङ्गस्थल
      - महालिङ्गस्थल
    - प्राणलिङ्गस्थल (हिरण्यगर्भ)
      - शिवलिङ्गस्थल
      - चरलिङ्गस्थल
    - इष्टलिङ्गस्थल (विराट्)
      - आचारलिङ्गस्थल
      - गुरुलिङ्गस्थल
  - अङ्गस्थल (जीव)
    - योगाङ्गस्थल (प्राज्ञ)
      - शरणस्थल
      - ऐक्यस्थल
    - भोगाङ्गस्थल (तैजस)
      - प्रसादिस्थल
      - प्राणलिङ्गिस्थल
    - त्यागाङ्गस्थल (विश्व)
      - भक्तस्थल
      - महेशस्थल

- शक्ति
  - भक्तिशक्ति
    - श्रद्धाभक्ति
    - नैष्ठिकभक्ति
    - अवधानभक्ति
    - अनुभवभक्ति
    - आनन्दभक्ति
    - समरसभक्ति
  - कलाशक्ति
    - क्रियाशक्ति — निवृत्तिकला
    - ज्ञानशक्ति — प्रतिष्ठाकला
    - इच्छाशक्ति — विद्याकला
    - आदिशक्ति — शान्तिकला
    - पराशक्ति — शान्त्यतीताकला
    - चिच्छक्ति — शान्त्यतीतोत्तराकला

लिङ्गाङ्गसामरस्यसद्भावदर्शक पट

लिङ्ग	मुख	शक्ति	तत्त्व	ज्ञानाङ्ग	कर्माङ्ग
महालिङ्ग	हृदय	चिच्छक्ति	शिवतत्त्व	हृदय	हृदय
प्रसादलिङ्ग	श्रोत्र	पराशक्ति	सादाख्यतत्त्व	श्रोत्र	वाक्
चरलिङ्ग	त्वक्	आदिशक्ति	अमूर्ततत्त्व	त्वक्	पाणि
शिवलिङ्ग	नेत्र	इच्छाशक्ति	मूर्ततत्त्व	नेत्र	पाद
गुरुलिङ्ग	जिह्वा	ज्ञानशक्ति	कर्तृतत्त्व	रसना	उपस्थ
आचारलिङ्ग	नासिका	क्रियाशक्ति	सकलतत्त्व	नासिका	पायु

अङ्गस्थल	भक्ति	हस्त	अर्पण	प्रसाद	अङ्ग	अवस्था	शरीर
ऐक्यस्थल	समरसभक्ति	भावहस्त	स्मर्तव्यपदार्थ	परिणामप्रसाद	आत्मा	सुषुप्ति	कारणशरीर
शरणस्थल	आनन्दभक्ति	ज्ञानहस्त	श्रव्यपदार्थ	शब्दप्रसाद	व्योम		
प्राणलिङ्गिस्थल	अनुभवभक्ति	मनोहस्त	स्पृश्यपदार्थ	स्पर्शप्रसाद	वायु	स्वप्न	सूक्ष्मशरीर
प्रसादिस्थल	अवधानभक्ति	अहङ्कारहस्त	द्रष्टव्यपदार्थ	रूपप्रसाद	अग्नि		
महेशस्थल	नैष्ठिकभक्ति	बुद्धिहस्त	रस्यपदार्थ	रसप्रसाद	जल	जाग्रत्	स्थूलशरीर
भक्तस्थल	श्रद्धाभक्ति	चित्तहस्त	घ्रेयपदार्थ	गन्धप्रसाद	भूमि		

ग्रन्थग्रन्थकार-मतमतान्तरसूची

विशिष्टा वीरशैवग्रन्थाः

लिङ्गधारणचन्द्रिका (म० म० प० शिवकुमारमिश्रकृतटीकासहिता)	३०.००
महानारायणोपनिषत् (वृषभदेवकृतशैवभाष्योपेता)	५.००
मुण्डकोपनिषत् (शाङ्करीव्याख्यासहिता)	५.००
ईशावास्योपनिषत् (,, ,,)	२.००
श्वेताश्वरतरोपनिषद्वीरशैवभाष्यम्, डॉ० टी० जी० सिद्धप्पाराध्यकृतम्	६.००
कैवल्योपनिषत् (सादाशिवभाष्योपेता)	५.००
ब्रह्मसूत्रशाङ्करीवृत्तिः	५.००
श्रीमद्भगवद्गीतावीरशैवभाष्यम्, डॉ० टी० जी० सिद्धप्पाराध्यकृतम्	१०.००
केनोपनिषत् (शाङ्करीव्याख्यासहिता)	११.००
सिद्धान्तशिखोपनिषत् (,,)	११.००
सिद्धान्तशिखामणिः (मूलमात्रम्), शिवयोगिशिवाचार्यविरचितः	६.००
श्रीजगद्गुरुरेणुकगीता (सिद्धान्तशिखामणिसारसंग्रहः), आङ्ग्लव्याख्यासहिता	५.००
श्रीकण्ठभाष्यं (चतुःसूत्रीभागः) श्रीमदप्पय्यदीक्षितकृत-शिवार्कमणिदीपिकासहितम्	३०.००
वीरशैव अष्टावरण-विज्ञान (हिन्दी), ले०—डॉ० चन्द्रशेखरशिवाचार्य	१५.००
वीरशैवदर्शनेतिहासदिग्दर्शनम् ,, ,, ,,	२.५०
सिद्धान्तशिखामणिसमयसमीक्षा ,, ,, ,,	२.५०

ग्रन्थप्राप्तिस्थान :

प्रबन्धक, जङ्गमवाडीमठ, वाराणसी—२२१००१